सोमस्य इदं सौम्यं याम्येन चाभवन्केशा बाहवो विष्णुतेजसा १३ सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत् वारुणेन च जंघोरू नितंबस्तेजसा भु-
वः १४ ब्रह्मणस्तेजसा पादौ तदंगुल्योर्कतेजसा वसूनां च करांगुल्यः कौबेरेण च नासिका १५ तस्यास्तु दन्ताः संभूताः प्राजाप-
त्येन तेजसा नयनत्रितयं जज्ञे तथा पावकतेजसा १६ भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च अन्येषां चैव देवानां संभवस्तेज-
सां शिवा १७ ततः समस्तदेवानां तेजोराशिसमुद्भवाम् तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः १८ शूलं शूलाद्विनिष्कृष्य ददौ
तस्यै पिनाकधृक् चक्रं च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः १९ शंखं च वरुणः शक्तिं ददौ तस्यै हुताशनः मारुतो दत्तवांश्चापं
बाणपूर्णे तथेषुधी २० वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः ददौ तस्यै सहस्राक्षो घंटामैरावताद्गजात् २१ कालदंडाद्यमो
दंडं पाशं चांबुपतिर्ददौ प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमंडलुम् २२ समस्तरोमकूपेषु निजरश्मीन्दिवाकरः कालश्च दत्तवान्ख-

णा चित्रानुलेपना कांतिरूपसौभाग्यशालिनीति एवं चतुरूपेण पिण्डितं त्रिगुणत्वं सूचितं तस्याश्चित्रत्वात् चित्रमाल्यादिधारणं वसूनामित्यस्य तेजसे
तिशेषः एवमन्यत्रापि १५ तस्या इति प्राजापत्येन दक्षादितेजसा तेन ब्रह्मणस्तेजसा पादाविसनेनन विरोधः पावकोग्निः १६ भ्रुवौ चेति संध्या
योस्तेजः भ्रुवावभूतामित्यन्वयः करणस्यैव कर्तृत्वविवक्षा पुनः संध्ययोः कृष्णः श्रवणौ श्रवणौ कृष्णाविति रहस्यमाला अन्येषां च देवानां संबंधितेज
सां शिवा चंडी संभवः एकीभावः कार्यं वा इत्यर्थः समुत्पाद्य जनयित्वेत्यर्थः परेषां तत्स्वरूपे एवमन्येपि अप्रचक्रे चेत्याहुरुक्ता एवप्रसिद्धो १७ तत
सा: इति तेजोराशिसमुद्भवामिति पञ्चत्वेपि गमकत्वात्समासः मुदं हर्षम् १८ ब्रह्मादिषु विद्यमानस्यैव तेजसो भगवती आविर्भूतेति तात्पर्यं एवमायुधा
दानेपि बोध्यम् शूलमिति विनिष्कृष्य आकृष्य इत्यर्थः समुत्पाद्य जनयित्वेत्यर्थः परेषां तत्स्वरूपे एवमन्येपि अप्रचक्रे चेति चाहुरुक्ता १९ शंखं चेति व
रुणाद्दृतस्य ऋषेः शांकः वायोश्चापबाणयोस्तोभ इत्यर्थः शक्तिं चेति चकारो वक्ष्यमाणपाशसमुच्चयः तथैव २० वज्रमिति देयमेतादृशे सेनयानः कुलिशं
तरूपादानेपि न दोषः २१ कालेति इष्माद्युत्तिशेषः प्रजापतिर्ब्रह्मा अक्षमालां कमंडलुं च ददावित्यन्वयः ब्रह्मा तमालाकमण्डलुमिति वा मनवश्रतोगा २२

दु. टी. मा. १० क्षीरोदश्चेति । अंगुलीयकरत्नदानांतं क्षीरोदः कर्ता विश्वकर्मणः परशुः अस्त्रकवचदानांते चूडामण्यादिकवचदानांतं विश्वकर्मणः कर्तृ
त्वमित्यन्वेतव्यं तन्नेत्रैर्धचंद्रशब्देन तदाकारो ललाटभूषणविशेषः अम्लानेत्याद्यपंकजदानांतं जलधिः कर्ता तत्रपंकजं हस्ते रत्नसिंहयोर्दाने
हिमवान्कर्ता अददादिति ददावशून्यमिति सुरया पूर्णम् २५ धनाधिपः कुबेरः कौटिल्यं तेन कुटिलेनानेनयथोक्तमार्ग
शत्रूणां पेषो दत्तादित्वात्तु कृतेति प्रथमतात्पर्यकारादिति ब्रह्मणः कोपे परिरजः आधिक्येन शिवस्य तमोगुणप्राधान्येन कोपेपि
तमोगुणस्याधिक्येन विष्णुकोपस्य पालनमूलकत्वेन सत्वाधिक्यावगतया त्रिगुणात्मकत्वेति ध्वन्यते अत एवोक्तं वैकृतिकरहस्ये सर्वदेवशरी
रेभ्यो याविर्भूतामितप्रभा त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनीति तत्रापि रजःसत्वयोराधिक्यं देवानां रजःसत्वमयत्वात् ८ ॥

क्षीरोदश्चामलं हारमजरे च तथाम्बरे चूडामणिं तथा दिव्यं कुंडले कटकानि च २४ अर्ध
चंद्रं तथा शुभ्रं केयूरान्सर्वबाहुषु नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमम् २५ अङ्गु
लीयकरत्नानि समस्तास्वङ्गुलीषु च विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम् २६
अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम् अम्लानपंकजां मालां शिरस्युरसि चापराम् २७
अददज्जलधिस्तस्यै पंकजं चातिशोभनम् हिमवान्वाहनं सिंहं रत्नानि विविधानि च २८
ददावशून्यं सुरया पानपात्रं धनाधिपः शेषश्च सर्वनागेशो महामणिविभूषितम् २९
नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥ ३०

दशाविति अनेनाष्टादशभुजा सहस्रभुजा चैवेति सूचितं तदुक्तं वैकृतिकेरहस्ये अष्टादशभुजा पूज्या सा सहस्रभुजा सती अष्टादशभुजन्धा
योऽस्यां विशेषोक्तेः सामान्यतस्त्वन्यैरपि देवैरायुधैरिति कर्म्येति भावः आयुधान्यत्र वक्ष्यंते दक्षिणाधः करक्रमात् अक्षमाला च कमलं बाणो
सिः कुलिशं गदा चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः अलंकृतभुजामेभिरायुधैः कमलासना
म् सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप पूजयेत्सर्वलोकानां सदेवानां प्रभुर्भवेदिति एवं सर्वायुधैरस्या आस्त्रीत्वेवैश्ववीत्वं च त्रिगुणात्म
कसर्वमूलभूताया देव्याः प्रादुर्भावस्ततसमानस्तिरतूचितम्

शैवीतं ४१

यद्यप्यत्र ब्रह्मादीनामिन्द्रादीनां च शरीरान्निष्क्रान्तं तेजो देवीविग्रहरूपेणाभिव्यक्तमासीत् आयुधानि च देवैः स्वस्वशूलादिभ्यो विनिर्गमय्य
दत्तानीत्येवोक्तम् तथापि देवीशरीरस्य शरणं वन्तद्देवपालनार्थे कदेशपालनशक्तिस्तेनेयं देव्यानिर्वर्तिता एवं महिषवधेन सर्वलोकरक्ष
णाय पुनरेकीभूय देवीमयं शरीरं एवं तदायुधानि तेजःशक्तयः प्राप्तानीति बोध्यम् अहं विभूत्या बहुभिरिह रूपैर्यदास्थितेत्यादि चरित्रगतवचनसमूहा
त् लक्ष्मीतन्त्रेपि शुंभप्रति लक्ष्मीवचनानि महालक्ष्मीरहं शक्रः पुनः स्वायंभुवेऽन्तरे दितायुग सर्वदेवानां जाता महिषमर्दिनीति महीयाः श
क्तिलेखालये तत्तद्देवशरीरेभ्यः धृतं मया तेः सम्भूतैः रूपं परमशोभनम् आयुधानि च देवानां यानि योनि हरीश्वर मत्स्वकाय स्वलक्षणा
णाण्यथा तिसमा भवन्निति वर्णितेन तवराशेरूप्यानामहिषमर्दिनीति यामले ३० संमानितेति साट्टहासमिति नादक्रियाविशेष
णम् अट्टहासः स्पष्टहासः नभः इति भुवो लोकोपलक्षणम् ३१ अमायतेति मामानेदेरितिदिकाभ्यतानन्त्यमासः तेनासंभवतेमा

सम्मानितां ननादोच्चैः साट्टहासं मुहुर्मुहुः तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ३१ अमायतातिमहता प्रतिशब्दो महा
नभूत् चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ३२ चचाल वसुधा चेलुः सकलाश्च महीधराः जयेति देवाश्च मुदा ताम्
ऊचुः सिंहवाहिनीम् ३३ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ३४ सन्नद्धाखिल
सैन्यास्ते समुत्तस्थुरुदायुधाः आः किमेतदिति क्रोधादाभाष्य महिषासुरः ३५ अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः स द
दर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ३६ पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् क्षोभिताशेषपातालां धनुर्ज्या
निःस्वनेन ताम् ३७ दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थिताम् ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ३८ शस्त्रास्त्रै
र्बहुधा मुक्तैरादीपितदिगन्तरम् महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ३९ युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः
रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ४०

र्थः अस्यन्त मसीत्यादिः नदद्देवेति निःसृतं चुक्षुभुरिति सप्रतिशब्देनेत्यादिः ३२ चचालेति महीधराः पर्वताः ३३ तुष्टुवुरिति भा
क्त्यानम्राः आत्मानः शरीराणि येषां ते तथा नम्रतनुरित्यर्थः अमरारयश्च सन्नद्धा इत्यर्थः ३४ सन्नद्धेति यु
द्धाय सन्नद्धानि सैन्यानि येषां आः इति क्रोधाविष्कारे अनेन च महिषासुरस्य मोहत्वं हत्वा कस्यचिल्लो
कस्य ... अत एव रजः सत्वाधिकदेव्या ... ३५ अभ्यधावतेति असुरैर्वृतः ३६ देवीविशेष
णानि पादेनेति धनुषो ज्याया मौर्व्याः निःस्वनेन धनुषः टंकारः ज्यायाष्टंकारः ३७ दिश इति समन्तात्सर्वतः ३८ शस्त्रास्त्रैरिति शस्त्रके
वले ... ३९ युयुधे इति अन्यैः प्रधानदैत्यैः सहितः चामराख्यः चिक्षुराख्यश्च रथनागहयपदातिरूपचतुरङ्गसेनायुतो युयुधे

दु. टी. ना. ११

अयुध्यतेति अयुतानामिति नियुतैरिति च नञ्तत्बहुत्वविवक्षया बहुवचनम् एवमग्रेपि एकं दश शतं चैव सहस्रमयुतं तथा लक्षं च नियुतं चैव कोटिरर्बुदमेव च वृन्दं खर्वो निखर्वश्च शंखः पद्मश्च सागरः अन्त्यं मध्यं परार्द्धं च दशवृद्ध्या यथाक्रमम् इति [illegible] ४१ अयुतानामिति गजवाजीत्यतो बिडालसेनम् ४२ वृत इति अथ तेषां वधानन्तरं अयुतानां पञ्चाशद्भिरयुतैः परिवारितो बिडालनामा तत्र संयुगे युयुधे इत्यन्तरश्लोकेनान्वयः इत्येतद् [illegible] बिडालनयनस्तथैति कामन पुस्तकेपि बिडालनयनशब्दो योगरूढो न केवलयौगिकः प्रकृते तु नामैकदेशे नामग्रहणम् अत एव बिडालस्वामिनेति वक्ष्यमाणे संगच्छते ४३ युयुधुरिति स्पष्टं ४४ युयुधुरिति

कोटिः पंचकोटिभिः षष्टिलक्षाणि

अयुध्यतायुतानां च सहस्रेण महाहनुः पंचाशद्भिश्च नियुतैरसिलोमा महासुरः ४१ अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे गजवाजिसहस्रौघैरनेकैः परिवारितः ४२ वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत बिडालाख्योऽयुतानां च पंचाशद्भिरथायुतैः ४३ युयुधे संयुगे तत्र रथानां परिवारितः अन्ये च तत्रायुतशो रथनागहयैर्वृताः ४४ युयुधुः संयुगे देव्या सह तत्र महासुराः पंचाशत्कोट्यः

५०६ कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ४५ हयानां च वृतो युद्धे तत्राभून्महिषासुरः तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ४६ युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ४७ देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ४८ लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ४९ मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी सोपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ५० चचारासुरसैन्येषु वनेष्विव हुताशनः निःश्वासान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका ५१ त एव सद्यः संभूता गणाः शतसहस्रशः युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ५२ नाशयन्तोऽसुरगणान्देवीशक्त्युपबृंहिताः अवादयन्त पटहान्गणाः शंखांस्तथापरे ५३ मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः ५४ खड्गादिभिश्च शतशो निजघान महासुरान् पातयामास चैवान्यान्घण्टास्वनविमोहितान् ५५

अस्यैवैतेनान्वयः आर्षं परस्मैपदं इत्यत्राहुः मनागपि ४५ हयानां चेति रथदन्तिहयानां प्रत्येकं कोटिकोटिसहस्रसंख्यायुतो महिषस्तत्राभूदित्यर्थः इत्यत्राहुः मनागपि भिन्दीति इत्यतः ४६ युयुधुरिति केचित्ते इत्यविशेषः अपरे इत्यत्राहुः मनागपि ४७ देवीमिति अपरे तत्र प्रसिद्धा देव्या इत्यर्थः शीघ्रगामित्वात्मनेपदं न बाधकं सत्वात् ४८ लीलयैवेति आयासरहिताननना ४९ मुमोचेति इत्यत्राहुः मनागपि धुताः कम्पिताः ५० चचारेति इत्यत्राहुः मनागपि प्राचयावनः ५१ त एवेति तावन्त एवेत्यर्थः एकैकनिःश्वासादेकैकगणाः संभूता इत्यर्थः ते गणाः ५२ नाशयन्त इति देवीशक्त्याप्यायिताः अवादयन्त वादितवन्त इत्यर्थः गणाः केचिदिति शेषः ५३ मृदंगांश्चेति युद्धमेव महोत्सवो वीराणां हर्षदत्वात् यस्मिन्नाहवे इति ११
तै वैदलैरित्यर्थः ५४ खड्गेति स्पष्टम् ५५

असुरानिति आकर्षयदिति कृषेश्चौरादिकाल्लङ् अपरइत्युत्तरान्वयि ५६ विपोथिताइति अपरे गदया विपोथिताः प्रामर्दिताः निपा
तेन निपतितेन भुवि शेरत इत्यन्वयः वेमुरिति वान्तवन्तः ५७ केचिदिति शूलेन वक्षसि भिन्नाः भूमौ निपतिताः निरन्तरा इत्यर्थः उत्तरार्द्ध
मुत्तरान्वयि ५८ सेनेति सेनानामनुरूपत्वात्कुर्वन्तीति सेनानुकारिणः शरौघव्याप्तत्वात् सेनासदृशाः तन्मरदशाश्च अपरे छिन्नग्रीवाः प्राणा
न्मुमुचुरित्यर्थः ५९ शिरांसीति छिन्नानीति शेषः ६० एकेति बाहुः पादः पार्श्वे तेषामेकतर इत्यर्थः उत्तरार्द्धमुत्तरान्वयि ६१ कबंधा इति
मनुष्याणां सहस्रे तु हतेषु मूर्धसु तदावेशात्कबंधः स्यादेकोऽप्युत्थितः क्रियान्वित इति लक्षिता अपरे कबंधा स्त्रायुधयुधुः ६२ कबंधा इति
उभयत्रापि युयुधुरिति शेषः छिन्नशिरस इति स्वरूपकथनं छिन्नानि शिरांसि येषामिति वा ऋष्टयः उभयतोधाराः खड्गाः भाषन्त इति के

असुरान्भुवि पातेन बध्वा चान्यानकर्षयत् केचिद्द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथापरे ५६ विपोथिता निपातेन गदया भुवि
शेरते वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ५७ केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि निरन्तराः शरौघेन कृताः केचि ग=
द्रणाजिरे ५८ सेनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः केषाञ्चिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ५९ शिरांसि पेतु
रन्येषामन्ये मध्ये विदारिताः विच्छिन्नजंघास्त्वपरे पेतुरुर्व्यां महासुराः ६० एकबाह्वक्षिचरणाः केचिद्देव्या द्विधा कृताः छि
न्नेपि चान्ये शिरसि पतिताः पुनरुत्थिताः ६१ कबंधा युयुधुर्देव्या गृहीतपरमायुधाः ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रि
ताः ६२ कबंधाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः ६३ पातितै रथनागाश्वैर
सुरैश्च वसुन्धरा अगम्या साभवत्तत्र यत्राभूत्स महारणः ६४ शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः मध्ये चासुर
सैन्यस्य वारणासुरवाजिनाम् ६५ क्षणेन तन्महासैन्यमसुराणां तथाम्बिका निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम्
६६ स च सिंहो महानादमुत्सृजन्धुतकेसरः शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ६७ देव्या गणैश्च तैस्तत्र कृतं युद्धं तथा
सुरैः यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ६८ इति मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरसैन्यवधः २

२५

द्भुतः ६३ पातितैरिति रथनागसहितैरश्वैरित्यर्थः एवमग्रेपि यद्वा प्राणिनां युद्धे सेनांगानामिति सेनांगशब्देन रथिकादीनामेव ग्रहणमि
ति नात्र नियमप्राप्तिः ६४ शोणितेति असुरसैन्यस्य मध्ये वारणासुरवाजिनां शोणितस्य ओघः प्रवाहो यासां ता इत्यपि नद्यः प्रसुस्रुवुः स्यन्द
न्ते स्म मासः ६५ ६६ स चेति तथ निन्ये इति शेषः तत्रान्येदन्ते अमरारीणां शरीरेभ्योऽसून् विचिन्वतीव भूतेलइ निर्गच्छ गमयन्कोदरः
देव्या इति चाप्यर्थे तुतुषुस्तुष्टाः ६८ इति श्रीवत्सभट्टसुतसतीगर्भजनानागोजीभट्टकृते सप्तशतीव्याख्याने द्वितीयोध्यायः २॥

दु॰ टी॰ ऋषिरुवाच निहन्यमानमिति १ २ तस्येति उत्करः समूहः वाजिनां यंतारं सारथिं च जघानेत्यन्वयः ३ चिच्छेदेति आशुगा बाणाः ४।५
ता॰ सिंहमिति सव्ये वामे ६ तस्या इति पफाल विशीर्णः तस्या भुजमित्यन्वयः ७ चिक्षेपेति तत् शूलं अंबरात् रविबिम्बमिवेत्यन्वयः तेजो
१२ भीरुत्थं पदशलोपश्छांदसः ८ दृष्ट्वेति तत् एव आपतत् शूलमापतत् आगच्छत् दृष्ट्वेत्यर्थः सच शतधा नीत इति शेषः ९।१० सोपी
ति हुंकारेतिस्फुटः ११ १२ तत इति समुत्पत्य आरुह्य गजकुंभांतरस्थितः स्त्वेकंपदम् १३ युध्यमानाविति नागात् गजात् युयुधा

ऋषिरुवाच निहन्यमानं तत्सैन्यमवलोक्य महासुरः सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकाम् १ स देवीं शरवर्षेण ववा
वर्ष समरे सुरः यथा मेरुगिरेः शृंगं तोयवर्षेण तोयदः २ तस्य छित्वा ततो देवी लीलयैव शरोत्करान् जघान तुरगान्बा
णैर्यन्तारं वाजिनां रथम् ३ चिक्षेप च ततस्तं चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् विव्याध चैव गात्रेषु छिन्नधन्वानमाशु
गैः ४ स छिन्नधन्वा विरथो हताश्वो हतसारथिः अभ्यधावत तां देवीं खड्गचर्मधरो सुरः ५ सिंहमाहत्य खड्गेन तीक्ष्णधारेण
मूर्धनि आजघान भुजे सव्ये देवीमप्यतिवेगवान् ६ तस्याः खड्गो भुजं प्राप्य पफाल नृपनंदन ततो जग्राह शूलं स कोपादरुण
स्त्ले लोचनः ७ चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ८ दृष्ट्वा तदापतच्छूलं देवी
शूलममुंचत तच्छूलं शतधा तेन नीतं स च महासुरः ९ हते तस्मिन्महावीर्ये महिषस्य चमूपतौ आजगाम गजारूढश्चाम
रस्त्रिदशार्दनः १० सोपि शक्तिं मुमोचाथ देव्यास्तामंबिका द्रुतम् हुंकाराभिहतां भूमौ पातयामास निःप्रभाम् ११ भग्नां
शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् १२ ततः सिंहः समुत्पत्य गजकुंभांतर
स्थितः बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा १३ युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ युयुधातेतिसंरब्धौ प्र
हारैरतिदारुणैः १४ ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा करप्रहारेण शिरश्चामरस्य पृथक्कृतम् १५ उदग्रश्च रणे
देव्या शिलावृक्षादिभिर्हतः दंतमुष्टितलैश्चैव करालश्च निपातितः १६ देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् बाष्क
लं भिंदिपालेन बाणैस्ताम्रं तथांधकम् १७ उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी १८
विडालस्यासिना कायात्पातयामास वै शिरः दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् १९ गमाय॥ [illegible]

तेतीत्यत्र प्रहृष्टत्वाभावश्छांदसः १४ तत इति युद्धानंतरं वेगात्खं उत्पत्य गत्वा पुनस्ततो निपत्य वृत्तीयैत्यर्थः १५ उदग्रश्चेति रणे युद्धे
देव्यैर्गजदंतनिर्मितास्त्रविशेषैः मुष्टिभिः तलैः चपेटैश्चेत्यर्थः यद्वा दंतैर्दंतदलनैरित्यर्थः १६ देवीति उद्धतं तन्नामानं भिंदीति स्पष्टम् १७ १८

एवमिति गणान् निश्वासभवान् २० कांश्चिदिति खुरः कवुर्गादिः २१ वेगेनेति वेगो गतिः भ्रमणं मण्डलाकारगतिः २२ निपात्येति
प्रमथागणाः २३ २४ वेगेति वेगयुक्तभ्रमणेन विक्षुण्णा ऊहिता व्यशीर्यत कर्मकर्तरि रूपं सर्वतः सर्वं प्लावविभक्तिकस्त्वसिः प्लावया
मास जलेनेति शेषः २५ धुतेति कंपितेत्यर्थः खंडसंखंडशस्त्रां क्रियार्थः श्वासानिलेनाक्षिप्य प्रक्षिप्ताः शिमाः अचलाः पर्वता काशात्
तरित्यर्थः २६ २७ सेति सा तस्योपरि पाशं क्षिप्त्वा तं बबन्धेत्यन्वयः २८ ततइति तस्मात् सिंहीभूतस्य ग्रहणपतेर्देव्येति शेषः २९ ततइति
तस्मात् सिंहीभूतस्य ग्रहणपतेर्देव्येति शेषः २९ पुरुषं देवी प्राग्वत् खड्गचर्मणेति समाहारद्वंद्वः तत्सहितं सायकैश्चिच्छेदेत्यन्वयः ३० क

एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः माहिषेण स्वरूपेण त्रासयामास तान्गणान् २० कांश्चित्तुण्डप्रहारेण खुरक्षेपै
स्तथापरान् लांगूलताडितांश्चान्यान् शृंगाभ्यां च विदारितान् २१ वेगेन कांश्चिदपरान्नादेन भ्रमणेन च निःश्वासपवनेना
न्यान्पातयामास भूतले २२ निपात्य प्रमथानीकमभ्यधावत सोऽसुरः सिंहं हंतुं महादेव्याः कोपं चक्रे ततोम्बिका २३
सोपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः शृंगाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च २४ वेगभ्रमणविक्षुण्णा म
ही तस्य व्यशीर्यत लांगूलेनाहतश्चाब्धिः प्लावयामास सर्वतः २५ धुतशृंगविभिन्नाश्च खंडं खंडं ययुर्घनाः श्वासा
निलास्ताः शतशो निपेतुर्नभसोऽचलाः २६ इति क्रोधसमाध्मातमापतंतं महासुरम् दृष्ट्वा सा चंडिका कोपं तद्वधाय तदाक
रोत् २७ सा क्षिप्त्वा तस्य वै पाशं तं बबंध महासुरम् तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे २८ ततः सिंहोभवत्सद्यो याव
त्तस्याम्बिका शिरः छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत २९ तत एवाशु पुरुषं देवी चिच्छेद सायकैः तं खड्गचर्मणा सा
र्द्धं ततः सोऽभून्महागजः ३० करेण च महासिंहं तं चकर्ष जगर्ज च कर्षतस्तु करं देवी खड्गेन निरकृंतत ३१ ततो महासुरो भू
यो माहिषं वपुरास्थितः तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ३२ ततः क्रुद्धा जगन्माता चंडिका पानमुत्तमम् पपौ पुनः
पुनश्चैव जहासारुणलोचना ३३ ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः विषाणाभ्यां च चिक्षेप चंडिकां प्रति भूधरान् ३४
सा च तान्प्रहितांस्तेन चूर्णयंती शरोत्करैः उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ३५

रेणेति महासिंहं दे वीवाहनं कर्षतस्तस्य सिंहस
िताद्रिः निराकृंततेति छिन्नवंतः ३१ ततइति तथैव प्राग्वदेव ३२ ततइति महिषस्य शिवावतारत्वेन जायमानत्वादि विविक्ते द्राग्या
म द्यपानेऽनुद्धर्मे बोधयितुं भ्रमनादनेवा-एतत् पानमद्यं कर्मणि लिङ्क् पानादरुणलोचना पुनः पुनर्जहास चेत्यन्वयः ३३ ननर्देति ब
लेनाशरीरम् वीर्यमुत्साहः ताभ्यां मदो गर्वः ३४ साचेति मदेनोद्धूतप्रतिशयेन जातो मुखरागो यस्याः सा आकुलाक्षरमिव वचनं क्रियाविशे
षणम् मदस्वभावोयम् ३५

दु॰ टी॰ नां॰ १२

देव्युवाच गर्जगर्जेति संभ्रमेण द्विरुक्तिः मदं च पिबामीति एवं पुनापि विप्रलम्भप्रतिज्ञेयमिति निर्देशः ३६ ऋषिरुवाच एवमिति
समुत्पत्य कूर्दनं कृत्वा तमारूढा अथ पुनः पादेनाक्रम्य कण्ठे शूलेनाताडयदित्यन्वयः ३७ तत इति तया पदाक्रान्तः स्वमुखादपि
ततः शूलताडनानन्तरम् ततः महिषस्वरूपीयान्निजमुखादर्धनिष्क्रान्तः निःसृतार्धकायः एव देव्या वीर्येण शक्तिप्रतिबन्धेन संवृतः प्रतिबद्धः नि
ष्क्रमितुमशक्त इत्यर्थः ३८ अर्धेति एवं च शिरश्छेदोद्भवं तद्दानवं शूलपाणिनं सिंहवाहिनी स्फुटदाघातेन वा युध्यमानं वाधः यत्र प्रति
शेषः कल्पान्तरीयमिति तत्र पुराकल्पे यथाह तं प्रतिकल्पं तथैव तत् प्रवर्तते स्वयं देवी दैत्यानां नाशनाय हि तथैव जायते शुभमिति कालि
कापुराणात् तन्त्रव्यवहारः तेन क्रियाप्रतिकल्पमेकैव न तु विजातीया उत्पत्तौ कल्पभेदेन क्वचिद्भेदो हयशिरादिरूपमात्रादिति वक्तव्यं ब्रह्म

३७ ३८ ३९

देव्युवाच गर्जगर्जक्षणं मूढ मधु यावत्पिबाम्यहम् मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ३६ ऋषिरुवाच एवमुक्त्वा समुत्पत्य
साऽऽरूढा तं महासुरम् पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ३७ ततः सोऽपि पदाक्रान्तस्तया निजमुखात्ततः अर्धनिष्क्रान्त ए
वाति देव्या वीर्येण संवृतः ३८ अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः तया महासिना देव्या शिरश्छित्त्वा निपातितः ३९ त
तो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् प्रहर्षं च परं जग्मुः सकला देवतागणाः ४० तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः जगु
र्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ४१ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरवधः ३ ऋषिरुवा
१= च शक्रादयः सुरगणा निहतेऽतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुल
कोद्गमचारुदेहाः १ देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः २ यस्याः प्रभावमतुलं भगवाननन्तो ब्रह्मा हरश्च न हि वक्तुमलं बलं च सा च
ण्डिकाऽखिलजगत्परिपालनाय नाशाय चाशुभभयस्य मतिं करोतु ३

देवैर्नेयमेवं शक्तिकल्पे तत्कल्पचरितमेवमेवोत्पन्नेति नारदप्रश्ने प्रतिकल्पं तेवमेव चरितं नात्र संशय इति ब्रह्मणोक्तत्वाच्च ३९ तत इति ननाश
पलायितं हाहेति कृतयेनेति सैन्यविशेषणं ४० तुष्टुवुरिति सुरा इन्द्राद्या दिव्यैर्ब्रह्मादिभिः सह महर्षिभिः सह तुष्टुवुरित्यर्थः ४१ इति समाप्तौ
व्याख्याने तृतीयोऽध्यायः ३ तुष्टुवुः सुराः स्तुतिमाह ऋषिरुवाच शक्रादय इति आदिनाम इत्यर्थः निहते तस्मिन्महिषासुरे देवास्ति हतेऽत्यन्वयः शिरो
धरा ग्रीवा अंसाः स्कन्धाः पुलकाः रोमाञ्चाः १ देव्येति आततं व्याप्तं ततः स्तुत्य च निःशेषदेवगणशक्तीनां समूहरूपा या मूर्तिस्तया कि समूह एव तेजोरूपश्च
यस्य मूर्तिर्विग्रहो यस्याः तया सर्वथा समूह इति भावेन कः ततोऽस्मिन्प्रणतिस्वरूपस्ताः २ यस्या इति यस्याः अतुलं प्रभावं तेजः बलं शारीरं कर्म अनन्तः सा
रस्वतोऽपि ब्रह्मा महापि हरः सर्वशक्तिरपि नालं न समर्थाः अशुभभयस्य सामर्थ्यः इहोदाससमाहारे ३ ॥ १२

याश्रीरिति पापात्मनां भवनेष्वलक्ष्मीः कृतधियां निर्मलान्तःकरणानां हृदयेषु च बुद्धिः स्वर्गापवर्गसाधनं ज्ञानं सतां हृदयेषु श्रद्धा आस्ति
क्यबुद्धिः कुलजनप्रभवस्य सद्वंशजन्मनो हृदयेषु लज्जा अकरणीयप्रवृत्तिजनकोन्तःकरणवृत्तिविशेषः नताः स्मेति प्राग्वत् ४ एवमापा
ततस्तुतिं विधाय तत्त्वमस्तावेवाह किमिति असुरादयः देवाः शिवादयः गणाः प्रमथास्तत्प्रभृतिषु अचिंत्यं सर्वोत्कृष्टत्वादनिरूपणी
यं तव रूपं अतः किं केन प्रकारेण वर्णयाम च परं दैत्यनाशकारि भूरि वीर्यं अतिप्रभुत्वं हृष्टवपरं युद्धेषु यानि चरितानि तान्यप्यतिप्रकृ
ष्टानि अतः किं वर्णयामेत्यन्वयः सर्वत्राऽचिन्त्यपदमूह्यमिति ५ मूलप्रकृतिश्च त्वमेवेत्याह हेतुरिति समस्तजगतां हेतुर्मूलकारणम्
तत्र हेतुः यतस्त्रिगुणा सत्त्वरजस्तमोयुता नन्वेवं रागादिदोषवत्त्वेन सर्वकारणत्वमनुपपन्नमित्यत आह अपीति त्रिगुणापि दोषै रागादिभिर्न ज्ञायसे
नाश्रिता भवसि यद्वा दोषैर्विशिष्टैः केनापि न ज्ञायसे दोषाभावादित्यर्थः नन्वेवं परिच्छिन्नतया सर्वदेवत्वं न स्यादत आह हरिहरादिभिरप
पारा अज्ञातपरिच्छेदा परिच्छेदाभावादित्यर्थः तत्र हेतुः यतः सर्वाश्रया सर्वेषामाश्रयः कार्यस्य सतः कार्यं हि कारणमाश्रयते सर्वत्र वर्तमा

याश्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपाल
य देवि विश्वम् ४ किं वर्णयाम तव रूपमचिन्त्यमेतत् किं चातिवीर्यमसुरक्षयकारि भूरि किं चाहवेषु चरितानि तवाद्भुतानि सर्वेषु देव्यसुर। नियां
दि= देवगणादिकेषु ५ हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि
परमा प्रकृतिस्त्वमाद्या ६ यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्य
से त्वमत एव जनैः स्वधा च ७ या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासि सा

ना च यतस्त्वमव्याकृता षड्विधविकाररहितत्वात् नामरूपहीनत्वाच्च हि यतः संसारस्याद्यभूता प्रकृतिः सत्त्वरजस्तमसां साम्यावस्थासि कीदृ
शी परमा परः आत्मा मीयते जीवभावेन परिच्छिद्यते यया परमात्मैव प्राकृतधर्माभासाज्जीवत्वेनाध्यवसीयते ६ यस्या इति हे देवि यस्याः समुदीर
णेन समस्तसुरता सकलसुरसमूहः सर्वयज्ञेषु तृप्तिं प्रयाति सा स्वाहा त्वमेवासि वै प्रसिद्धं तथा पितृगणस्यापि तृप्तिहेतुस्त्वमेव यतः अत एव जनैः
पितृकर्माणि स्वधा च उच्चार्यसे चात्स्वाहा देवकर्मणि ७ प्रकृतिस्वरूपत्वमुक्त्वा ब्रह्मरूपिणीत्वमेवेत्याह येति हे देवि या मुक्तिहेतुः अविचिन्त्यमहाव्रता विद्या०
अचिंत्या या अप्यविच्छेद्यं महाव्रतं अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहरूपं यमादिप्रसिद्धं साधनं यस्याः ईदृशी च या सा भगवती भगवद्रिच्छया
परमा उत्कृष्टा विद्या न द्वितीयावरणभञ्जिका ब्रह्मज्ञानरूपा त्वमेवासि हि यतः अत एव समस्तरागादिदोषैर्मोक्षकामैर्मुनिभिर्वशीकृते
न्द्रियैः तत्त्वं ब्रह्मैव ज्ञेयत्वेन सारो येषां तैरभ्यस्यसे इत्यर्थः च अभ्यस्यसे इत्यत्र सन्धिः संहितायामनित्यत्वात् ८ ॥ रामायनमः

दु॰ टी॰ ना॰ १४

शब्देति सुविमलानामपौरुषेयत्वेन दोषरहितानां ऋग्यजुषां उद्गीथः साम्नां भक्तिविशेषः तेन रम्यः पदपाठो येषां साम्नां तेषां च निधा
नमाश्रयः शब्दब्रह्मरूपा भवस्य संसारस्य भावनायोत्पत्तये विच्छेदाय या देवी द्योतनशीला त्रयी वेदत्रयी सा त्वं भगवती [illegible] विशेषतः सर्वे
जगतां अतिशयेन पीडाहन्त्री अनेन सर्वविद्यात्मरूपत्वमेवोक्तम् ९ तदधिष्ठात्र्यपि त्वमेवेत्याह मेधासीति मेधा सर[illegible]सेवडः त्वमेव
त्वेन दुर्गापि त्वमुच्यते दुर्गमसंसारसागरस्य नौः ज्ञानद्वारा एवं सत्यहं न ब्रह्मास्मीत्युक्ते प्रसिद्धतो व्यतिरेकमाह असंगेति [illegible] हृदि कमलाधा
रादिसंगवती शंभोः कृता प्रतिष्ठा आसनं यया अर्धशरीरत्वात् उक्तरूपेण शैवी वैष्णवी चोक्ता १० ईषदिति ईषद्धाससहितं क्रोधरसः पा
दृश्यमयः [illegible] विलोक्यापि आमयोषेण प्राणत्यागो न कृतो महिषासुरेण सहसा दर्शनसमकालमेव तस्याः [illegible] निग्रहे यत्नः

शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नां देवी त्रयी भगवती भवभावनाय वार्त्ता च सर्वजगतां
परमार्त्तिहन्त्री ९ मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसङ्गा श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा १० ईषत्सहासममलं परिपूर्णचन्द्रबिम्बानुकारि कनकोत्तमकान्तिकान्तम् अत्यद्भुतं प्रहृत
मात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ११ दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः शु=
प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितान्तकदर्शनेन १२ देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि
कोपवती कुलानि विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य १३ ते सम्मता जनपदेषु धनानि तेषां तेषां
यशांसि न च सीदति धर्मवर्गः धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना १४ ॥ रामः

इतेनद्धास्यश्चर्यमित्यर्थः जगन्मोहकमपि तत्सम्मोहरत्वं ति सुभटोयं तादृशमपि वधेन देव्या एवोत्कर्षः सिद्ध्यति ११ दृष्ट्वेति दृष्ट्वा
पीडयेः भ्रुवोः कुटीरचना तया करालं भीषणं उद्यच्छशाङ्केन नेनातिरिक्ता अनेन महिषस्यातिधीरत्वं देव्या उत्कर्षः प्राग्वदेव १२ देवीति
हे देवि प्रसीद इत्यस्या विचार्यमर्थमेतद्वचः प्रसन्नत्वादेव तवेत्याह भवती परमा सानुग्रहा मा उद्दिश्य स्यात्ता हश्री कथमेतज्ज्ञातं तत्राह येता
नो भवाय कोपवती सती त्वं नो रिपूणां कुलानि सद्यो विनाशयसि मत्संप्रतिपत्तिमाह विज्ञातमित्यादि एवं च कोपोऽप्युपरक्षणफल
कोऽनन्तस्वाभाविकइति सत्वगुणप्रधानत्वं सूचितम् १३ त इति संमताः सत्कृता जनानां नागरिकाः धर्मवर्गस्त्रिवर्गः धर्मार्थकाममोक्ष
रूपः धन्याः पुण्यत्वेन प्रसिद्धाः निभृता नितरां पालिता आत्माद्याः अभ्युदयदा सर्वमनोरथदा १४ ॥ ॥

धर्म्याणीति हे देवि भवतीप्रसादात् यः सुकृती प्राग्जन्मार्जितपुण्यवान् तत एव सुकृतमेव तत्प्रसादादेव सुकृत्यादतः नित्यनैमित्तिका
दावतिश्रद्धावान् प्रतिदिनं सदैव षट्कर्मकारकादेव सकलानि धर्म्याणि कर्माणि करोति पुनस्तत एव तत्स्वर्गं देशेन कृतकर्मभोगाल्लव
प्रसादादेव स्वर्गं प्रयाति ततः क्रमेण चामोक्षं च न तु निश्चये तेन त्वं लोकत्रयेपि फलदा हि तस्मात्त्वं सेव्या इति भावः १५ दुर्गे इति दुर्गे दुर्गमा
सङ्कटे स्मृतिमात्रेण नश्यति केशरीव दारिद्र्यदुःखे भावे भयं प्रतिकूलं तथा न जं आर्द्रं चित्तं विना दुर्गास्मरणेन च दुर्गा नगादि
स्वरूपं दुर्गा सर्वसुखकारणम् स्मरणे च दुर्गा सर्वस्वरूपे विस्मृत्य नगादिषु सर्वेषु सर्वसुखकारणम् स्मरणे विस्मृतिरिति च युक्तं हि सोः स्मरणं हि इति
दुःसर्वदुर्गा सर्वसुखकारणम् स्मरणे च दुर्गा सर्वरूपे विस्मृत्य नगादि सर्वे विस्मृत्य सर्वसुखकारणम् स्मरणं विस्मृतिरिति च युक्तं हि सोः स्मरणं हि इति
तिवृन्दारकीयोक्तेः १६ सर्वोपकारित्वमुपपादयति एभिरिति हे देवि निर्मथ्यः उपैति निरस्य उपैति मध्यः एते दैत्या नाम मम भुवनमेव नर

धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेपि
फलदा ननु देवि तेन १५ दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि दारिद्र्यदुःखभयहारि
णि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता १६ एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वन्तु नाम नरकाय चिराय पापम्
संग्राममृत्युमधिगम्य दिवं प्रयान्तु मत्वेति नूनमहितान्विनिहंसि देवि १७ दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासु
रानरिषु यत्प्रहिणोषि शस्त्रम् लोकान्प्रयान्तु रिपवोपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वपि तेतिसाध्वी १८ खड्गप्रभानि
करविस्फुरणैस्तथोग्रैः शूलाग्रकान्तिनिवहेन दृशोसुराणाम् यन्नागता विलयमंशुमदिन्दुखण्डयोग्याननं तव विलो
कयतां तदेतत् १९ दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिन्त्यमतुल्यमन्यैः वीर्यं च हन्तृ हृतदेवपराक्रमाणां वैरिष्व
पि प्रकटितैव दया त्वयेत्थम् २०

। कायेनेति नाम दृष्ट्वैव च हत्वैव तया परिणामत्वे प्राप्य स्वर्गं गत इति देवतयैव न निःकृत्वा जगदहिताः विनिहंसीत्यर्थः १७ दृष्ट्वैवेति दर्शने
च रेणैव तावन्मात्रेणैव भस्मकरणयोग्येषु यच्छस्त्रसंपातनमस्ति तेषामपि लोकप्राप्तये इति ते सुपकारिके वृत्तमिति किं वक्तव्यं भक्तो
ष्विति भावः १८ खड्गेति निकरः समूहः विस्फुरणं सर्वत्र प्रसरणं निवहः समूहः यदिति लयं नागता तदेतत् अंशुमान्यादि इन्दुखण्डयो
ग्यं तद्युक्तं माननं तव विलोकयतां च तेषां प्राप्यादिति शेषः १९ दुर्वृत्तेति दुर्वृत्तानां वृत्तं पापं तस्य शमनं तव शीलं स्वाभाविको गुणः
तथा रूपं च त्वमेतदविचिन्त्यं कीदृशमिति चिन्ताविषयः दृष्ट्वैव किं नेत्यादिना उक्तं रूपमाकृतिः च पर हतामर्षस्तु नादेवा येन दृशः परा
क्रमो येषां तेषां दैत्यानां हन्तृ वीर्यं एवं चेदृशरूपेण दयावलेन च तेषां शत्रूणां नरकमपि न दीयते पापशान्तये इति तेषु दयैव त्वया कृतेति भावः २०

दु·सी·
ना·
१५

केनेति अतिहारि मनोहरं विरोधो ऽलंकारः केनोपमेति तृतीया आर्षत्वात् चित्ते कृपा रिपूणामप्युपकारकत्वात् निष्ठुरता तत्क्षण एव आ
त्र कृपा स्वाभाविकी निष्ठुरता त्वारोपितेति विरोधपरिहार इति बोध्यम् २१ त्रैलोक्यमिति त्वयेत्यनमेकान्वयः ततो रिपुगणा इत्यतन्मएव
वाक्यं भयमित्यतो भवमित्यन्तमपरं अनेन चित्ते कृपेत्येतद्दृढितं नमस्त इत्यनेन नमस्कारान्तरितः अस्य प्रकारकरणे वास्माकं सामर्थ्यमि
ति सूचितम् २२ २३ प्राच्यामिति दक्षिण इत्यत्र दिग्भागे इति शेषः भ्रामणेनेत्यत्र कस्य भावप्राधः २४ सौम्यानीति सृष्टिस्थितिव्याप
राणि अत्यर्थघोराणि संहारव्यापाराणि तथा भुवं पृथ्वी चेत्यर्थः २५ सङ्गीति सङ्गः संसर्गः २६ ऋषिरुवाच एवमिति सुरैरिति कुति

केनोपमा भवतु ते ऽस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि कुत्र चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्र
ये ऽपि २१ त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्धनि ते ऽपि हत्वा नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमु
न्मदसुरारिभवं नमस्ते २२ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च २३ प्राच्यां
रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि २४ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् २५ खड्गशूलगदादीनि यानि चास्त्राणि ते ऽम्बिके करपल्लवसङ्गीनि तैरस्मा
२२ न्रक्ष सर्वतः २६ ऋषिरुवाच एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः अर्चिता जगतां धात्री तथा गन्धानुलेपनैः २७ भक्त्या
समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान् २८ देव्युवाच व्रियतां त्रिदशाः सर्वे यदस्म
त्तो ऽभिवाञ्छितम् देवा ऊचुः भगवत्या कृतं सर्वं न किंचिदवशिष्यते २९ यदयं निहतः शत्रुरस्माकं महिषासुरः यदि चापि व
रो देयस्त्वयास्माकं महेश्वरि ३० संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ३१
तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदाम् वृद्धये ऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ३२ रामायन नमो नमः

न्यायेन नन्दनमपि परमपि नन्दनं देवोद्यानं दिव्यैरलौकिकैः गन्धाः श्रीखण्डादयः अनुलेपनं श्रीचन्दनादि २७ भक्त्येति दिव्यैर्मनोज्ञैः धूपैस्तु धू
पिता इत्यादिः देव्युवाच व्रियतामिति देवा ऊचुः भगवत्येति २९ यदिति यत इत्यर्थः पूर्वान्वयार्थं उत्तरार्द्धमुत्तरान्वयि यदि चाप्यत्र एवम
र्थे यद्येवं तथापि वरो देय इति तत्र वक्तव्य इत्यर्थः अस्माकं अस्मभ्यमित्यर्थः ३० संस्मृतेति हिंसेथा नाशय उत्तरार्द्धमुत्तरा
न्वयि ३१ तस्येति वित्तर्द्धिविभवैरिति सहयोगे तृतीया भवनेन सार्द्धम् वित्तं धनं तस्य ऋद्धिरुपचयः विभवा ऐश्वर्यादयः धनदारादीनां
संपदश्च तत्संपन्नभावाः आदिनाऽगारादि वृद्धये ऽपचयाय ३२ १५

उत्तरचरित्रस्य रुद्र ऋषिः महासरस्वती देवता अनुष्टुप् छन्दः भीमा शक्तिः भ्रामरी बीजम् सूर्यस्तत्त्वम् सामवेदस्वरूपम् महासरस्वतीप्रीत्यर्थे उत्तरचरितपाठे विनियोगः। घण्टाशूलहलानि शङ्खमुसले
चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्। गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महापूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्॥ १॥

ऋषिरुवाच इतीति तथा त्वं नः आत्मनः स्वार्थे इत्यन्वयः तथेत्युक्त्वा तथास्त्वित्युक्त्वा भद्रं कालयति वर्धयतीति निरुक्त्या भद्रकाली अन्तर्हिताऽद
र्शनं गता अभूदित्यन्वयः ३३ इतीति निगमयन् ३४ पुनश्चेति गौरीदेहाद्देवकार्यार्थं यथा इत्यर्थः समुद्भवः प्रादुर्भावः यथा येन प्रकारेण त
स्या देव्याः उपकारिणी च इति तत्तेनाप्यस्याः कोऽयं लाभः उपकारिणीति उपकारस्य भावः अत्यर्थः तच्छृणुष्व मया कथ्य
मानं तत्प्रकारं मया मनः निपातोऽयं लोकानां लोकपालेन लक्ष्मीश्च लक्ष्मीः शुम्भनिशुम्भ ... सारं मद्धितं ... मदि
देवकार्यं समुद्भूता देवैः स्तुतिभिः इत्यनिरुद्धं तस्या लोके देवेश्वरी कथयति स्म देवी शरणागतानां वेदपारगाः ...
धिप समनन्तर मिति महत्त्वातकृतीयके देवी महर्षिभिः स्तुत्वा देवायायतनमिति सा लोकेषु विशदं वर्णयति उज्ज्वल विशेषणानि सुष्ठा
भिः स्तवनयोग्यानि लोके वस्तुनीति तत्प्रतिपादनाचेति बोध्यम् इति शिवभट्टसुतनागोजीभट्टकृते सप्तशतीव्याख्या
नेचत्वारोऽध्यायः ४
ऋषिरुवाच इति पुरा शुम्भनिशुम्भाभ्यां देवेन्द्रं गतोऽर्थं तथा त्वं नः तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ३३ इत्येतत्कथितं भूप
संभूता सा यथा पुरा देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ३४ पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् वधाय दुष्टदैत्या
नां तथा शुम्भनिशुम्भयोः रक्षणाय च लोकानां देवानामुपकारिणी तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ३५ इति मा
र्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शक्रादिस्तुतिः ४ ऋषिरुवाच पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् १ तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् कौबेरमथ याम्यं च चक्राते वरुणस्य च २
यथावत्कथयामीति प्रतिज्ञातमिति हासमाह ऋषिरुवाच पुरेति ... शुम्भनिशुम्भाविति समासे ... चेति वाम
नपुराणे ... तामसे ... गौरीदेहात्समुद्भूता कौशिकीति तदाहरम् वधाय दुष्टदैत्यानां तथा शुम्भनि
शुम्भयोः मदीयाः ... सा अम्बिका ... यथा यथा संह
मामवितुः सर्वामरीणां ... ततः पश्चाच्छुम्भनिशुम्भकाविति नारायणीस्तुतिनाम ... परमशोभनम् पुरंदर
नयादृष्टे देवेरग्निपुरोगमैः ... कौशिका ... देवेशु सर्वकामप्रदा ... स्तुतिशोभित
राजते: ... महालक्ष्मीर्महाभागा प्रकृतिः परमेश्वरी ... स्तन
यितृत्वं ... सकलैः सुरैः नमो देव्यादिके देवी सूक्तं सर्वकामप्रदम् इमां देवीं ... सकलानेव महद
मूले यज्ञभागे ... देवीपदेनोपक्रमादिति बोध्यम् महोत्सवः ... तावता ... सर्वस्वभावः सर्वे
भ्योऽदेव्यादिके देवीसूक्ते देवीपदेनोपक्रमादिति बोध्यम् महोत्सवः बलशक्तिः १ तावति स्वत्रिक्रमेण लोकान्त्रयतीति सूर्यत्वं सप्त

दु·टी·
नाः
१६

तावेवेति पवनः अस्यतेऽनेनेति करणे क्तिः अनेनेनर्द्धिकारमित्यर्थः विनिर्द्धूताः कंपिताः अतः परैः आसमंतान्निर्जिताः संतो भ्रष्टराज्या इ
त्यर्थः २ हृतेति आत्मसात्कृतेत्यर्थः अधिकारा येषां हृतास्त्रिदशाः त्रिदशाधिकारान्तनूपार्थौ तंभावेतो कार्याभावः तेनत्रयस्त्रिंशदित्य
र्थः तेचादित्या द्वादश रुद्रा एकादश वसवोऽष्टौ विश्वेदेवौ द्वाविति एकः एव त्रिंशत्संख्येतिभयार्थः निराकृताः स्वर्गादपि निःसारिताः ३
संस्मरंतिस्मेत्यन्वयः वर्तमानसामीप्ये लट् ४ तयेत्यादि तयेति स्मृतास्मृती अखिलाः परमापदइत्यन्वयः इतीति भवाग्याथ अभि
प्रक्रम्यान्तवादिमवद्वमनं तत्र हिमवति शुंभनिशुंभवधमस्याः सरस्वतीत्वेपि यथा विलसमायात्वं तथोक्तमुपक्रमे ६ प्रशाद्वयोतितानस
वील्येनस्तुतिमाह देवा ऊचुः नमइति देवीत्यादिमतीमहादेवी महाकाली महालक्ष्मी नाम पि देवानां स्वर्गादिप्रवद्वारप्रवर्तयित्री शिवा

तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ततो देवा विनिर्द्धूता भ्रष्टराज्याः पराजिताः २ हृताधिकारास्त्रिदशास्ताभ्यां सर्वे नि
राकृताः महासुराभ्यां तां देवीं संस्मरंत्यपराजिताम् ४ तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः भवतां नाशयिष्या
मि तत्क्षणात्परमापदः ५ इति कृत्वा मतिं देवा हिमवंतं नगेश्वरम् जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ६ देवा ऊ
चुः नमो देव्यै महादेव्यै शिवायै सततं नमः नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ७ रौद्रायै नमो नित्यायै गौर्यै
धात्र्यै नमो नमः ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ८ कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः नैरृत्यै भूभृ
तां लक्ष्म्यै शर्वाण्यै ते नमो नमः ९ दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः १०
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ११ ६ = रामाय नमः

शक्तिरूपा प्रकृत्यै सृष्टिशक्त्यै भद्रायै पालनशक्त्यै नियताः समाहितचित्ताः प्रणतानम्राः स्मेतिपादपूरणे ७ रौद्रायैइति संहारशक्त्यै नि
त्यायै कालानवच्छिन्नाभिमान्यै शक्तिरूपा च गौरी तद्वर्णा धात्री जगदाधारा ज्योत्स्ना चंद्रकिरणा इन्दुश्चंद्रः रूपमतत्पराज्योतीरूपतस्य
सुखायै परमानंदरूपा ८ कल्याण्यैइति तत्कर्त्री वृद्धिरुपचयः सिद्धिरणिमादिरष्टविधा प्रणतानम्राः नमो नमः कुर्म इत्यन्वयः निर्ऋतिर
लक्ष्मीः स्वार्थेऽण् यद्वा नैर्ऋत्यै रक्षःशक्त्यै शर्वाणी शिवशक्तिः दुर्गायैइति दुःखेन गम्यायै दुर्गो दुरधिगमः पारः परिच्छेदो यस्यास्तस्यै दुर्गात्संसारा
त्तारकत्वाद्वा सारायै तद्रूपै सर्वकारिण्यै सर्वजननेश्वर्यै प्रकृतिपुरुषयोर्भेदज्ञानं ख्यातिस्तद्रूपायै प्रसिद्धायै वा कृष्णायै तद्वर्णायै कृष्णशक्तिरू
धूम्रायै तद्वर्णायै धूम्रशक्तिरूपायै १० अतीति विद्यातेन संसारतापशामकत्वादतिसौम्या अविद्यारूपत्वेन संसारहेतुत्वादतिरौद्रा नमोनमइत्येतदुक्ति
द्वयं नत्यानन्त्यद्योतनार्थम् जगत्प्रतिष्ठा जगदुपादानकारणं जगदाधारश्च देव्यै देवशक्त्यै कृतिः क्रिया ११ ॥ ॥ १८

ज्ञानं

येति विष्णुमायाप्रभृतावित्येतिशब्दिता सर्वागमेषु प्रतिपादिता नमस्तस्यै इति त्रिकोणात्कायिकवाचिकमानसिकरूपेण नमस्कारः स्वयं दर्शि
तम् एवमग्रेऽपि १२ चेतना निर्विकल्पकं या चिच्छक्तिरित्युच्यते १३ बुद्धिः सविकल्पकज्ञानं १४ निद्रा सुषुप्त्यवस्था स्वप्नावस्था च १५
क्षुधाभ्यवजिहीर्षा १६ छायासमारानपाभावः वर्णप्रसादश्च १७ शक्तिः कार्यजननसामर्थ्यं १८ तृष्णाप्राप्तात्मीयवस्तुकांक्षा १९
क्षान्तिः सत्यपि सामर्थ्येऽपकारिणि अपकाराचिकीर्षा २० जातिर्गोत्वादि २१ लज्जा स्वाकार्यविषयाल्पज्ञानभीः २२ शान्तिरिन्द्रियसं
यमः विषयोपरतिरूपः २३ श्रद्धाक्रत्वायुष्वास्तिक्यम् २४ कान्तिः शोभा २५ लक्ष्मीर्धनादिसंपत् मोक्षप्राप्तिर्वा २६ वृत्तिर्जी

यादेवीसर्वभूतेषु विष्णुमायेतिशब्दिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः १२ यादेवीसर्वभूतेषु चेतनेत्यभिधीय
ते नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः १३ यादेवीसर्वभूतेषु बुद्धिरूपेणसंस्थिता नमस्तस्यै नमस्तस्यै॰ नमोनमः १४
यादेवीसर्वभूते॰ निद्रारूपेण॰ नमस्तस्यै॰ १५ यादेवीसर्वभू॰ क्षुधारूपेण॰ नमस्तस्यै॰ १६ यादेवी॰ छायारू॰ नम॰ १७
यादेवीसर्वभूते॰ शक्तिरूपेण॰ नमस्तस्यै॰ १८ यादेवीसर्वभू॰ तृष्णारूपेण॰ नमस्तस्यै॰ १९ यादेवी॰ क्षान्तिरू॰ नम॰ २०
यादेवीसर्वभूतेषु जातिरूपेणसंस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः २१ यादेवीसर्वभूतेषु लज्जारूपेणसंस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः २२ यादेवीसर्वभूतेषु शान्तिरूपेणसंस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोन
मः २३ यादेवीसर्वभूतेषु श्रद्धारूपेणसंस्थिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः २४ यादेवीसर्वभूतेषु कान्तिरू
पेण॰ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमः २५ यादेवी॰ लक्ष्मीरू॰ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः २६ यादेवी॰ वृ
त्तिरू॰ नमस्तस्यै॰ २७ यादेवी॰ स्मृतिरू॰ नमस्तस्यै॰ २८ यादेवीस॰ दयारू॰ नमस्तस्यै॰ २९ यादेवी॰ तुष्टिरू॰ नमस्त॰
स्यै॰ ३० यादेवी॰ मातृरूपे॰ नमस्त॰ ३१ यादेवीस॰ भ्रान्तिरू॰ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः ३२ इंद्रियाणाम
धिष्ठात्री भूतानां चाखिलेषु या भूतेषु सततं तस्यै व्याप्तिदेव्यै नमोनमः ३३ चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत्
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः ३४

विकावृत्तिश्च २७ स्मृतिरनुभूतविषयं ज्ञानं २८ दयापरदुःखप्रहाणेच्छा २९ तुष्टिर
धिगताधिकानभिलाषः ३० माता पालयित्री मातृका अधिष्ठात्री देवता च ३१ भ्रान्तिरतद्वति तद्रूपमयः ३२ इंद्रियेति याऽखिलेषु भू
तेषु अंतर्यामिविधया स्थिता इंद्रियाणां ज्ञानकरणानां भूतानां च ज्ञानविषयाणां सूक्ष्मस्थूलानां अधिष्ठात्री प्रवर्त्तिका निवर्त्तिका च त
स्यै व्याप्तिरूपदेव्यै व्यापिकायै इत्यर्थः ३३ चितिः चयनं वृत्तिः ३४ प्रचनमस्यैनेननमोतमंत्रस्वरूपेण इदमुपलक्षतस्तमस्तमवस्व १८

दु॰ टी॰ ना॰ १३

अयाचितसंश्रयः विष्णुमायाचेतनाबुद्ध्यादिनिर्देशस्तथा। या ब्रह्मशक्तिस्तत्स्मा च लोके तिरोहितेति जनः परे १ लज्जा शान्तिस्ततः श्रद्धा कान्तिर्लक्ष्मी-
स्ततः परा वृत्तिः स्मृतिर्दयाचैव तुष्टिर्मातृस्ततः परम् २ भ्रान्तिर्योनिस्थितिश्चैव त्रयोविंशतिसंख्यकाः इत्येवाधिकमनामबन्धात्रैकामायने
स्फुटम् स्तोत्रेति या शुभहेतुरीश्वरी सुरैरिन्द्रादिभिः पूर्वं स्तुता तथाभीष्टसिद्धिमतदेवधेनसत्यभीष्टसंश्रयात्प्रार्थनात् दिनेषु प्रतिदिनं सेविता
सा नः शुभानि भद्राणि अभिनिहन्तु शमयितः करोतु आपदश्चाभिहन्तु नाशयतु ३५ येति साम्प्रतं च या ईशा उद्धतदैत्यैरस्माभिः उद्धतदैत्यपीडितैः नमस्यते
स्तूयते च करोतु सा न इत्यनेनान्वयः या च भक्तिनम्रशरीरैरस्माभिः स्मृता सती स्मृतिविषयतां गता तत्क्षणमेव नः सर्वापदो हन्तीति करोतु सा न इत्यनेनान्वयः
ऋषिरुवाच एवमिति तत्र देवसन्निहिते देशे हे राजन् पार्वती जाह्नव्यास्तोये स्नातुमिव स्नानीय स्तवनयुक्तानां देवानामभिसन्निधौ ययौ

स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेन्द्रेण दिनेषु सेविता करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः ३५
या साम्प्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्तिभिः ३६
ऋषिरुवाच एवं स्तवाभियुक्तानां देवानां तत्र पार्वती स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ३७ साब्रवीत्तान्सुरान्सुभ्रूर्भव-
द्भिः स्तूयतेऽत्र का शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ३८ स्तोत्रं ममैतत्क्रियते शुम्भदैत्यनिराकृतैः देवैः समेतैः स-
मरे निशुम्भेन पराजितैः शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका कौशिकीति समस्तेषु ततो लोकेषु गीयते ३९ ता-
स्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती कालिकेति समाख्याता हिमाचलकृताश्रया ४० ॥ ॥ शमः

विमृष्टः ३७ तथापि तेषामज्ञाने दृष्ट्वा कास्तूयत इति पृष्टवती सेति कामदन्या स्तूयते यत्स्तोत्राभिभाववपमदस्याया अभावादिति भावः ततो-
ज्ञानमेव दृष्ट्वा तेषां दर्शयावाक्यमब्रवीत् अस्याः स्वकिः शरीरात्प्रतिरूपेः शरीररूपात्कोशतो गृहात्समुद्भूता सत्वप्रधानांशेन प्रादुर्भूता तत एव
शिवाऽब्रवीदित्यर्थः ३८ किमब्रवीदित्याह स्तोत्रमिति समेतैर्मिलितैः रणे निशुम्भेन पराजितैः अत एव शुम्भेन निराकृतैः स्वस्थानान्निःशोधितैः ३९
शरीरेति यत्तन्निर्गता तत्कौशिकीति गीयत इत्यन्वयः कौशिकीति मूलस्थमध्यतः शरीरात्स्वशक्तिरेव स्वरूपेण निर्गतेति बोध्यम् ४० तस्यामि-
ति कृष्णाभूत् असिताभूत् पूर्वं तु रक्तवर्णा इदानीं कृष्णवर्णा पार्वती गौरीति तन्नामसमाख्या पार्वत्याः गौरवर्णा कौशिकीकरणाद्गौरीति नाम तस्मा-
न्निबोध्यम् अयमाशयः स्थाने तदुक्तं वैकृतिकरहस्ये गौरीदेहात्समुद्भूता या सत्वैकगुणाश्रया साक्षात्सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी दधौ च
अष्टजावाणमुसलशूलचक्रभृत् शंखं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छतीति शिवदूतीसहिता या
देवी शुम्भनिशुम्भादिदैत्यानरीसंवभूवतः याचितनपुसामाभ्यां ब्रह्मणः परमेष्ठिनः अवध्यत्वं जगत्यस्मिन्पुरुषैरखिलैरपि अयोनिजा तु या क-
न्या स्यादकोशसमुद्भवा अज्ञातपुंस्पर्शरतिरविलङ्घ्यपराक्रमा तया स्वनो वधः सख्ये तस्याः कामाभिभूतयोः इति चाभ्यर्थितो ब्रह्मा ताभ्या १३

प्राह तथास्त्विति ततस्ताभ्यां जगातिउपद्रुते तयोर्लयाय देवैर्ब्रह्माप्रार्थितवाग्निरवं विनियापि रहस्यं वाक्योथयिवायथा तथं तद्वर्णे कोशाज्ञाशक्तिमकामांकन्यकात्मिकां निशुंभशुंभयोर्हंत्री देवेभ्यो दातुमर्हसि एवमभ्यर्थितो धाताभग वाञ्जीललोहितः कालीत्याहरहस्यवामितुतेः ऊर्ध्वं तां दृष्ट्वा कोऽयं कालीत्युक्तमिति शिवेनोक्तेः भूयसी च तवाप्रीति रंगौरमितिमेवपुः कोऽहं त्रिरपिकालीतिवदेति कथमन्यथेति देवीवचनं श्रुत्वा तस्य कथं विदेवात्तयादेवीगौतमाश्रमं प्राप्य तपश्चरित्वा रजोगुणाधिकात् ब्रह्मणो गौरत्वं प्राप्य नीलकोशमुत्सृष्टवती ततः कोशादुद्भूता कौशिकीत्युक्तं तत्कोशांशसहसो त्सृज्य गौरीसा समजायत तत्कोशादात्मनोत्सृष्टा कोशिकीनाम नामतः कोशात्कालाबुदप्रख्या कन्यका समजायत सात माया लिकाशक्तिर्योगनिद्रा हरेः स्मृतेति ततः प्रस्तावात् यादेव्या देवान्प्रति कौशिकी महिमा कथितः किं देवेनन सा दृष्टा यो त्सृष्टा कौशिकी मया तादृशी कन्यका लोके न भूता न भविष्यति अज्ञानतुं स्पर्शरति रथ्यश्चाचालिसुंदरीति यस्याः शरीरको शाद्विनिर्गता सा मातंगी पानिःसृता सैवोग्रतारा उग्रादपि भयात्त्राती त्यतः इति कालिकापुराणे स्पष्टम् तथा याका

ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम् दर्दर्श चंडो मुंडश्च भृत्यौ शुंभनिशुंभयोः ९२ ताभ्यां शुंभाय चाख्याता सातीवसु मनोहरा काप्यास्ते स्त्री महाराज भासयंती हिमाचलम् ९३ नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम् ज्ञायतां काप्य सौ देवी गृह्यतां चासुरेश्वर ९४ स्त्रीरत्नमतिचार्वंगी द्योतयंती दिशस्त्विषा सा तु तिष्ठति दैत्येंद्र तां भवान्द्रष्टुमर्ह ति ९५ यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो त्रैलोक्ये तु समस्तानि सांप्रतं भांति ते गृहे ९६ ऐरावतः समा नीतो गजरत्नं पुरंदरात् पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ९७ विमानं हंससंयुक्तमेतत्तिष्ठति तेंगणे र त्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतं ९८ निधिरेष महापद्मः समानीतो धनेश्वरात् किंजल्किनीं ददौ चाब्धिर्मालामम्लानपं कजाम् ९९

यकोशादुद्भूता कालिकायाः स्वभैरवा साकौशिकीति विख्याता चारुरूपा मनोहरेति च तत्रैव ९१ तत इति परमुत्कृष्ट ९२ ताभ्यामिति शुंभायेति क्रियया यमभिप्रैतीति संप्रदानत्व काप्यनिर्वाच्या नैवेति असौ देवी कापि अतो ज्ञायतां मनुष्यदानवादौ तत्स्वरूपं विचार्यतां गृह्यतां च अंगीक्रियतां च ९४ ननु किमस्यां गीकारस्तत्राह स्त्रीर त्नमिति उत्तमस्त्रीत्यर्थः भवान् तां द्रष्टुमर्हति सा तव दर्शनयोग्या यतोऽतोंगीक्रियतामिति भावः तद्धेतो एवं च स मस्तरत्नानि यत तव गृहे तदियमपि तव भविष्यत्येवेति भावः ९६ तदेव विवृणोति ऐरावत इति ९७ विमानमिति

दु.टी.
ना
१८

वेधसो वरमुद्रस्यापि यद्विमानमानीतं तदद्भुतं एवंचांगीतवह्निसकलाजयत्वं स्यचितं आनीतं वलाद्रतुदंतस्य
दन्नवरला चैतेनोपेतितन इतिहृदयम् ४९ निधिरिति किंजल्किनीतन्नामिकां द्वदावित्यस्य भयादितिबोधः ४९
छत्रमिति कांचनस्रावि स्वर्णवर्षणशीलम् प्रजापतेर्दत्तस्य अयंतिस्यन्दनमजेयः ५० मृत्योरिति उत्क्रांति

छत्रं ते वारुणं गेहे कांचनस्राविति ष्ठति तथायं स्यंदनवरो यः पुरासीत्प्रजा
पतेः ५० मृत्योरुत्क्रांतिदा नाम शक्तिरीश त्वया हृता पाशः सलिलराजस्य
भ्रातुस्तव परिग्रहे ५१ निशुंभस्याब्धिजाताश्च समस्ता रत्नजातयः वह्नि
रपि ददौ तुभ्यमग्निशौचे च वाससी ५२

१८

मरणं परिग्रहे परिजनेकरणकुत्वत्त्वाहृतेवा ५१ निशुंभस्येति अब्धिजाता रत्नजातयश्च निशुंभस्य परि
इत्यर्थः अग्निशौचे अग्निरेव शौचं नैर्मल्यकरणं ययोरित्यर्थः कल्पवृक्षोपकल्पितमदेवत्वमग्निप्रक्षेपा
पनेमलेवासो युग्ममग्निशौचमाहुः ५२

एवमिति तेइतिकर्त्तः शेषत्वविवक्षायां षष्ठी ५३ ऋषिरुवाच निशम्येति सुग्रीवं तन्नामानं ५४ इती
चेति इदंचेत्यर्थः वक्ष्यमाणस्यपरामर्शः अनेनशुंभनिशुंभयोरजोगुणमयत्वंसूचयति अतएवे

एवंदैत्येंद्ररत्नानिसमस्तान्याहृतानिते स्त्रीरत्नमेषाकल्याणीत्वया
कस्मान्नगृह्यते ५३ ऋषिरुवाच निशम्येतिवचःशुंभः सतदाचंडमुंड
योः प्रेषयामाससुग्रीवंदूतंदेव्यामहासुरं ५४ इतिचेतिचवक्तव्या
सागत्वावचनान्मम यथाचाभ्येतिसंप्रीत्यातथाकार्यंत्वयालघु ५५
सतत्रगत्वायत्रास्तेशैलोद्देशेतिशोभने सदेवींतांततःप्राहश्लक्ष्णंमधु
रयागिरा ५६

तद्वधार्थंसत्वगुणप्रधानोवतारइतिबोध्यम् लघुशीघ्रं ५५ सेति स्पष्टः ततःशुंभसकाशात् यत्रशै
लोद्देशेसादेवीआस्ते तत्रगत्वाश्लक्ष्णमनल्पकंमधुरयाकोमलयागिराप्राहेत्यन्वयः ५६

दु.टी.
ना.
१८
१९

दूत उवाच देवीति न केवलं दैत्येश्वर एव किं तु त्रैलोक्यस्य परमेश्वर इत्यर्थः सकाशं समीपं ५७ त
देवोपपादयति अव्याहतेति देवयोनिषु तदाज्ञा गणेषु ५८ तदुक्तिमाह ममेति वशानुगास्त एव वानु
गास्त इत्यर्थः पृथक्पृथगिन्द्राद्यधिकारिभेदेन ५९ त्रैलोक्य इति अशेषतः अशेषाणि हृत्वेत्याद्युत्त

दूत उवाच देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः दूतोऽहं प्रेषितस्तेन त्वत्सकाश
मिहागतः ५७ अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु निर्जिताखिलदैत्यारिः
स यदाह शृणुष्व तत् ५८ मम त्रैलोक्यमखिलं मम देवा वशानुगाः यज्ञभागान
हं सर्वानुपाश्नामि पृथक्पृथक् ५९ त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः त
थैव गजरत्नं च हृत्वा देवेन्द्रवाहनं ६० क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः उच्चैःश्र
वससंज्ञं तत्प्रणिपत्य समर्पितं ६१ यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च रत्नभू
तानि भूतानि तानि मय्येव शोभने ६२

१८

रान्वयि ६० क्षीरोदेति तदश्वरत्नं हृत्वा इन्द्राद्बलात्कारेण गृहीत्वा अमरैः प्रणिपत्य मम समर्पितमित्यर्थः
उच्चैःश्रवसेत्यत्र पृषोदरादित्वादडागमः ६१ यानीति रत्नभूतानि श्रेष्ठानि रत्नरूपाणि स्थितानीत्यर्थः
६२

स्त्रीति वयमित्यात्मगौरवे बहुवचनम् ६३ मां वेति उरुविक्रमं महाविक्रमं वै प्रसिद्धौ ६४ परमेति प्राप्स्यसे इति क्रोंदस्तत्व मत्परिग्रहात्
मद्ग्रहणात् समालोच्य विचार्य मत्परिग्रहतां मत्पत्नीत्वं ६५ ऋषिरुवाच इतीति अन्तः स्मितत्वेन मावदेलन गम्भीरत्वं सूचितम् ६६ देव्युवाच स
त्यमिति अत्र शुम्भविषये त्रैलोक्याधिपतिरिति सम्मतं ६७ किं त्विति अत्र परिग्रहत्वविषये अल्पबुद्धित्वादिति संभवाय प्रतिज्ञाहानौ च महान्दो
षः पापं च गुरुत्वपरिग्रहे ६८ प्रतिज्ञातमाह यो मामिति जयति संग्रामातिरिक्तेनापि प्रकारेण संग्रामे यो मे दर्पं बलत्वाभिमानं व्यपोहति य
श्च मे प्रतिबलः समानबलः एवं सर्वाभावे उत्तरः तादृश्यपत्नत्वज्ञपद्वेति गूढ आशयः ६९ तदेति पाणिग्रहणात्पूर्वं मम गमनमनुचितमिति।

स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ६३ मां वा ममानुजं वापि निशुम्भमुरुविक्र।
मं भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ६४ परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ६५
ऋषिरुवाच इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ६६ देव्युवाच सत्यमुक्तं त्व।
या नात्र मिथ्या किंचित्त्वयोदितं त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ६७ किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् श्रू
यतामल्पबुद्धित्वात्प्रतिज्ञा या पुरा कृता ६८ यो मां जयति संग्रामे यो मे दर्पं व्यपोहति यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ६९
तदागच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ७० दूत उवाच अवलिप्तासि मैवं त्वं देवि ब्रू।
हि ममाग्रतः त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयोः ७१ अन्येषामपि दैत्यानां सर्वे देवा न वै युधि तिष्ठन्ति सम्मुखे देवि किं पुनः
स्त्री त्वमेकिका ७२ इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि सम्मुखम् ७३ सा त्वं गच्छ।
मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ७४ देव्युवाच एवमेतद्बली शुम्भो निशुम्भश्चातिवी।
र्यवान् किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ७५ स त्वं गच्छ मयैवोक्तं यदेतत्सर्वमादृतः तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु यत् ७६
इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये दूतसंवादः ५

भावः ७० दूत उवाच अव लिप्तेति अवलेपो गर्वः एवं ममाग्रतः यद
ग्रे उभावपि न तिष्ठेत्तदग्रे स्त्री न तिष्ठेदिति भावः ७१ नन्वहं देवी अतः स्यामित्यत आह अन्येषामपीति द्वयम् एकिकेति कुत्सायां कप्रत्ययः
७२ ७३ उपसंहरति सा त्वमिति मयैवेत्यनेनाम्यागमनेऽन्येषां सर्वेषां दुष्टतया गौरवं न मिश्रेदित्यर्थः तदेव विपक्षे बाधकमाह केशाकर्षणेन वि
धूतं विलीनं गौरवं यस्यास्तादृशी मा गमिष्यसि अपि तु मानजयेः सकाशात्त्वम् ७४ देव्युवाच एवमेतदिति सोपहासवचनं प्रतिज्ञेति स्पष्टं तेनेति शाब्दः
सत्वमिति मयोक्तं यदेतत्सर्वमादृतः सन् तदाचक्ष्व सद्युक्तं तत्करोतु चेत्यन्वयः आदृत इत्यनेन नान्यतरिक्तं वदेति सूच्यते ७६ इति सप्त

५

दु॰ टी॰ पा॰ ११

ऋषिरुवाच इतीति अमर्षः कोपः समाचष्ट उक्तवान् १ तस्येति दैत्यानामधिपं सेनापतिम् २ हेइति दुष्टां दुर्वचनां विह्वलां आकुलाम् ३ ४ ऋषिरुवाच तेनेति सहस्राणामसुराणां षष्ट्या वृत इत्यन्वयः ५ स इति तुहिन हिमं मूलं समीपम् ६ विघ्नेतेबाधकमाह नचेदिति नयहीत्यर्थः ७ देव्युवाच दैत्येश्वरेणेति एवं केशाकर्षणविह्वलाम् बले सामर्थ्ये सेनाच सावष्टंभोक्तिरेषा ८ ऋषिरुवाच इतीति तं साम

ऋषिरुवाच इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः समाचष्ट समागम्य दैत्यराजाय विस्तरात् १ तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् २ हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ३ तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ४ ऋषिरुवाच तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ५ स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ६ न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ७ देव्युवाच दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः बलान्नयसि मामेवं ततः किं ते करोम्यहम् ८ ऋषिरुवाच इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः [illegible] हुंकारेणैव तं भस्म सा चकाराम्बिका ततः ९ अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः १० ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ११ कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् आक्रम्य चाधरेणान्यान्स जघान महासुरान् १२ केषांचित्पाटयामास नखैः कोष्ठानि केसरी तथा तलप्रहारेण शिरांसि कृतवान्पृथक् विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः १४ क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना तेन केसरिणा देव्या वाहनेनातिकोपिना १५ श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः १६ चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ १७ हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ तत्र गच्छत गत्वा च सा समानीयतां लघु १८ रामः

स चकारेत्यर्थः ९ अथेति अंबिका कर्त्री अतएव तथापदस्यावर्त्तनम् १० [illegible] सैन्ये देव्याः [illegible] इति मत्वा सिंहोप्युयुधे तइति [illegible] विशेषणम् स्ववाहन इति [illegible] स्वीयवाहन इत्यर्थः पपात प्राविशत् ११ कांश्चिदिति [illegible] आक्रांति राक्रमणं तेन [illegible] इत्यन्वयः १२ केषामिति कोष्ठानि उदरमध्यानि तलो विस्तरांगुलिः पाणिः १३ १४ १५ श्रुत्वेति हतमिति [illegible] इत्यर्थः १६ तौ एवं वक्ष्ये १७ हे चंडेति [illegible] गच्छत गत्वा

१४

आनयने प्रकारद्वयमाह वान्येन केशेष्विति आकर्षणमात्रादागमनेवं बंधने वह्निगौरवाद्धेतुवचनं सेनाभिप्रायेण वा तथा सहयुधि
हेतुमतो यदि वस्तावधुने संदेहस्तदा सर्वैर्दैत्यैः सकलायुधैः साविशेषेण निहन्यतामार्थः तामित्यर्थः उपसंहरति १९ तस्यामिति आगम्या
तामित्येतेन सर्वथा गृहीतमशक्या चेदेवं हतत्वानाम्यथेमाह वद्धेति अरुणोतिपक्षानुरेयदिशकोतेनद्विविधानां गृहीत्वैवागंतव्यमित्यर्थः धूम्र
लोचनवधे श्लोकसमावली २० इति श्रीविश्वभट्टहस्तमनीगर्भजनागोजीभट्टकृते सप्तशतीव्याख्याने षष्ठोध्यायः ६ ऋषिरुवाच आज्ञाप्ता इति
१ ददृशुरिति शैलेन्द्रशृंगे हिमाचलशृंगे सिंहस्योपरि स्थितामित्यन्वयः २ ते इति चतुरंगबलः सप्रधानाः समादातुं गृहीतुं उद्यमं उद्योगं उ
द्यताः उत्साहवन्तो जाताः आकृष्टं कर्णान्तं कृष्टं कोशादुद्धृतम्यतत्समीपगाः गृहीतुमुद्यतानां तेषामर्थं समीपगा इत्यर्थः ३ अनेन च कालरात्री

केशेष्वाकृष्य बध्वा वा यदि वः संशयो युधि तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् १९ तस्यां हतायां दुष्टायां सिंहे च वि
निपातिते शीघ्रमागम्यतां बध्वा गृहीत्वा तामथाम्बिकाम् २० इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये धूम्रलोच
नवधः ६ ऋषिरुवाच आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः चतुरंगबलोपेता ययुरभ्युद्यतायुधाः १ ददृशुस्ते ततो
देवीमीषद्धासां व्यवस्थिताम् सिंहस्योपरि शैलेन्द्रशृंगे महति काञ्चने २ ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः आकृष्टचापा
सिधरास्तथान्ये तत्समीपगाः ३ ततः कोपं चकारोच्चैरम्बिका तानरीन्प्रति कोपेन चास्या वदनं मषीवर्णमभूत्तदा ४ भ्रुकु
टीकुटिलात्तस्या ललाटफलकाद्द्रुतम् काली करालवदना विनिष्क्रान्तासिपाशिनी ५ विचित्रखट्वाङ्गधरा नरमालाविभूष
णा द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ६ अतिविस्तारवदना जिह्वाललनभीषणा निमग्नारक्तनयना नादापूरितदि
ङ्मुखा ७ सा वेगेनाभिपतिता घातयन्ती महासुरान् सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ८ पार्ष्णिग्राहाङ्कुशग्राहियोध
घण्टासमन्वितान् समादायैकहस्तेन मुखे चिक्षेप वारणान् ९ तथैव योधं तुरगै रथं सारथिना सह निक्षिप्य वक्त्रे दशनैश्चर्व
यन्त्यतिभैरवम् १० एकं जग्राह केशेषु ग्रीवायामथ चापरम् पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ११ = ग्रमः

नामपि तामसत्वे धनितम् अनन्तरं धार्ष्ट्यमतितामसी प्रादुर्भावमाह तत इति मषी लिपिसाधनद्रव्यं तद्वत् श्यामवर्णा निःसरति काली
प्रतिर्वृत्तादितिभावः भ्रुकुटीति तस्याः कुटिलदेशात् विनिष्क्रान्ता निःसृता ५ विचित्रेति खट्वाङ्गपट्टिकाकंकालचन्द्रिकां कालपंजरास्थि वा
नरमाला नरशिरःस्रक्तु कुटिलात् तिलकः द्वीपी व्याघ्रः शुष्कमांसा निर्मांसदेहा अत एवातिभैरवा ६ अतीति अतिशयितो विस्तारो यस्य ललाट
शोवदने यस्या इत्यर्थः ललनं चालनं निमग्नानि निम्नप्रविष्टानि नयनानि यस्याः त्रिनेत्रत्वात् ७ ८ पार्ष्णीति पार्ष्णिग्राहो गजपार्श्वरक्षकः अंकु
शग्राही महामात्रः योधो गजारूढो वीरः ९ तथैवेति योधमिति जात्यावैकवचनम् एवं रथमपरमश्वमित्यादावपि चर्वयति वर्तमानसामीप्ये

तैरिति मथितान्यपि मथितानि चूर्णीकृतानीत्यर्थः १२ बलिनामिति महात्मनां १३ १४ १५ शरेति चण्डः शरवर्षैः मुण्डः सहस्रशः क्षिप्तैश्चक्रैश्छा
दयामासेत्यन्वयः एवं च श्लोके चण्डमुण्डाभ्यामुपलक्षणम् १६ तानीति सुबहूनि विशमानानि चक्राणि घनोदरं विमानानि अर्कबिंबानीव
बभुः शोभन्ते ततइति भीममिति क्रियाविशेषणम् वक्त्रान्तर्वक्त्रमध्ये विकटदन्तत्वाद् दुर्दर्शा ये दशनास्तैरुज्ज्वला तेजोमयी १८ उत्था
येति महासिंहमारुह्य उत्थाय इत्यस्य सकोपवारणं यथा स्यात्तथा महासिंहमारुह्य देवी चण्डमधावत असिना चण्डस्य तेनोद्यतेन १९ अथेति त्वा

तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः मुखेन जग्राह रुषा दशनैर्मथितान्यपि १२ बलिनां तद्बलं सर्वमसुराणां महात्मना
म् ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा १३ असिना निहताः केचित्केचित्खट्वाङ्गताडिताः जग्मुर्विनाशमसुरा दन्ताग्राभि
हतास्तथा १४ क्षणेन तद्बलं सर्वमसुराणां निपातितं दृष्ट्वा चण्डोभिदुद्राव तां कालीमतिभीषणाम् १५ शरवर्षैर्महाभीमैर्भी
माक्षीं तां महासुरः छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः तानि चक्राण्यनेकानि विशमानानि तन्मुखम् बभुर्यथार्कबिं
बानि सुबहूनि घनोदरम् १७ ततो जहासातिरुषा भीमं भैरवनादिनी कालीकरालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला १८ उत्थाय च म
हासिंहं देवी चण्डमधावत गृहीत्वा चास्य केशेषु शिरस्तेनासिनाछिनत् १९ अथ मुण्डोभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् तमप्य पातय=
पातयद्भूमौ सा खड्गाभिहतं रुषा २० हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् २१ शि
रश्चण्डस्य काली च गृहीत्वा मुण्डमेव च प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् २२ मया तवात्रोपहृतौ चण्डमुण्डौ महापशू
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि २३ ऋषिरुवाच ॥ तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ उवाच कालीं
कल्याणी ललितं चण्डिका वचः २४ यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता चामुण्डेति ततो लोके ख्याता देवि भविष्यसि
२५ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये चण्डमुण्डवधः ७

ग्राभिहतं खड्गाभिहतं अस्य शिरो न छिन्नं किं तु खड्गप्रहारमात्रं २० २१ शिर इति मुण्डं स शिरस्कं तद्देहमित्यर्थः प्रचण्डाट्टहा
सेन मिश्रं क्रियया भवति तथा यथा ललाटफलकान्निर्गता सा देवी प्राहेत्यर्थः २२ मयेति युद्धयज्ञे महापशू इति रूपकम् इयन्तौ प्रधाना
महारणे चण्डमुण्डावुपहारः २३ ऋषिरुवाच ताविति कालीं ललाटभवां कल्याणीति कर्तृविशेषणं चण्डिका कौशिकी २४ यस्मादिति चा
ण्डशिरोहारात् हे देवि ख्याता भविष्यसीत्यन्वयः चामुण्डेति पृषोदरादित्वात्साधु २५ अनेनेयमामसीत् कौशिकी न त्वा काली कौशिकी
नियम्येति दर्शितम् इति श्रीमहामहोपाध्यायश्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते सप्तशतीव्याख्याने सप्तमोध्यायः ७ ॥ २०

चण्डे इति ऋषिरुवाच चण्डे इति क्षयितेषु क्षतेषु १ तत इति तेषां वधजकोपेनास्वाधीनचेताः अत एव स्त्रीवधे प्रवृत्त इति भा-
वः सर्वसैन्यानामिति दैत्यानां विशेषणम् २ अद्येति उदायुधाः उद्यतायुधाः तत्सत्तकाम्बूनां कम्बूनां तन्नाम्नां चतुरशीतिर्दैत्या इति शेषः ३
कोटीति कोटिवीर्याणि तन्नामानि धौम्राः धूम्रवंश्याः ४ कालकास्तन्नामानः दौर्हृदाः दुर्हृदोऽपत्यानि मौर्यास्तन्नामानः तथा कालका-
अपत्यानि कालकेयाः असुराः सज्जाः ससामग्रीकाः ५ इत्येति भैरवशासनम् ६ आयान्तमिति आयान्तमित्यर्थः अन्तरं मध्यं ७ तत इति
तन्नादानिति बहुवचनम् महानादमित्येकत्वविवक्षया अतीवेत्यस्यानेकवारमित्यर्थो वा उपबृंहयत् दीपयामास इत्यर्थः ८ धन्विति ना-

ऋषिरुवाच चण्डे च निहते दैत्ये मुण्डे च विनिपातिते बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः १ ततः कोपपराधीनचेताः शुम्भः
प्रतापवान् उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह २ अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः कम्बूनां चतुरशीतिर्निर्यान्तु
स्वबलैर्वृताः ३ कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ४ कालका दौर्हृदा
मौर्याः कालकेयास्तथासुराः युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ५ इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः नि-
र्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ६ आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ज्यास्वनैः पूरयामास धरणीगगनान्तरम्
७ ततः सिंहो महानादमतीव कृतवान् नृप घण्टास्वनेन तन्नादमम्बिका चोपबृंहयत् ८ धनुर्ज्यासिंहघण्टानां नादापूरि-
तदिङ्मुखा निनादैर्भीषणैः काली जिग्ये विस्तारितानना ९ तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् देवी सिंहस्तथा
काली सरोषैः परिवारिताः १० एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् भवायामरसिंहानामतिवीर्यबलान्विताः ११ ब्रह्मे-
शगुहविष्णूनां तथेन्द्रस्य च शक्तयः शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः १२ यस्य देवस्य यद्रूपं यथाभूषणवाहनम्
तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ १३ हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभि-
धीयते १४ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा १५ नमश्चण्डिकायै नमः

दैः स्वानैरापूरिता दिङ्मुखा काली धनुर्ज्यासिंहघण्टानां भीषणैर्नादैर्जिग्ये जिता देव्या धनुरादिशब्दैः कालीशब्दो जित इति भावः ९ काली
बालीलतादज्ञा तमिति सरोषैः सक्रोधैः एतस्मिन्निति देवीदानवसंग्रामावसरे भवाय संपदे ११ ब्रह्मेति विष्णुशब्देन वराहनृसिंहावपि शा-
क्तयः स्वाभ्यतिरेकिण्यो देवता शक्तिशक्तिमतोरभेदात् १२ ब्रह्मादिदेवैः परिस्फुर्तं कं तद्रूपैरिति आयाचुः यस्येति तद्वत् तथाविधभूषणवा-
हनेत्यर्थः १३ हंसेति विमानाग्रे विमानस्याग्रे स्थिता इति शेषः अक्षसूत्रं जपमाला ब्रह्मणोऽपत्यं स्त्री ब्राह्मणी नाम्नीति अभिधीयते १४
माहेश्वरीति महाही महाऽहिः तान्येव वलया यस्याः चन्द्ररेखा तत्कला १५ ॥

दु.टी.
ना.
२१

कौमारीति गुहरूपिणी गुहसमानाकारा कुमारसंबन्धिनी शक्तिरायुधो विन्यर्थाच्चपोनरुक्त्यं ऐंद्रीवज्रापि यथाशक्रस्तथैव सेतिवत् ग्रंवि(
कापटेन गुहस्य शिवसूहागाबनसूचयति नथेवेति अत्र शार्ङ्गपदेन वाणोपलक्ष्यते वाजभिर्गरुडसूहा शंखचक्रगदासिनी शार्ङ्गवाण(
धरानानौवलवीकृपाणालिनीति वामनपुराणात् पतेनास्याः षड्भुजत्वम् १७ यज्ञेति यज्ञांशाकल्पितवराहाकारः विभ्रतोहरेरिसने(
नास्य विलसमेवेतिसूचितम् एवं नृसिंहेपि नचैवंकाचिद्गतोसारभवराहवदेहविग्रहाः शरभपतत्पाति तंवराहवलहारकतवशंकेन्यसिंह(
स्यचवराहानुयाधित्वशंकेविरुध्येतेतिवाच्यम् तस्य लीलामात्रत्वात् १८ १९ वज्रेति यथाशक्रइत्याकारपरम् एवं सर्वासुतत्तदाकार
तादृश्या गजराजपरावतः २० प्रतिविशिष्टतेजसः कौशिक्याः सविधे स्वयंगतमशक्तास्तादेवशक्तीरीशानोदेवोदर्शितवानित्याह

कौमारीशक्तिहस्ताचमयूरवरवाहना योद्धुमभ्याययौदैत्यानंविकागुहरूपिणी १६ तथैववैष्णवीशक्तिर्गरुडोपरिसंस्थि(
ता शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ १७ यज्ञवाराहमतुलंरूपंयाबिभ्रतोहरेः शक्तिःसाप्याययौतत्रवाराहींबि(
भ्रतीतनुम् १८ नारसिंहीनृसिंहस्यबिभ्रतीसदृशंवपुः प्राप्तातत्रसटाक्षेपक्षिप्तनक्षत्रसंहतिः १९ वज्रहस्तातथैवैन्द्रीग(
जराजोपरिस्थिता प्राप्तासहस्रनयनायथाशक्रस्तथैवसा २० ततःपरिवृतस्ताभिरीशानोदेवशक्तिभिः हन्यंतामसु(
राःशीघ्रंममप्रीत्याहचंडिकाम् २१ ततोदेवीशरीरात्तुविनिष्क्रांतातिभीषणा चंडिकाशक्तिरत्युग्राशिवाशतनिनादि(
नी २२ साचाहधूम्रजटिलमीशानमपराजिता दूतत्वंगच्छभगवन्पार्श्वंशुंभनिशुंभयोः २३ ब्रूहिशुंभंनिशुंभंचदानवाव(
तिगर्वितौ येचान्येदानवास्तत्रयुद्धायसमुपस्थिताः २४ त्रैलोक्यमिंद्रोलभतांदेवाःसंतुहविर्भुजः यूयंप्रयातपातालंयदि

तत इति ताभिः परिवृत ईशानः ममप्रीत्या एताभिर्देवशक्तिभिर्महासुरा हन्यंतामिति चंडिकामाहेत्यन्वयः स्वशक्तेः पार्वत्याः शाङ्कर्यत्वेन(
पृथग्व्या ईशान एव तथोक्तवानिति भावः ब्रह्माधिकारिणामसंबन्धाद्यः ब्रह्मतत्त्वाधिकारिणां शुंभादिजितत्वेन पृथक्तासंभवात् २१ स्व
स्यापि सहाय्यदृष्टौ तेनैषद्रुष्टा भगवती तस्योत्तरं नाह किंतु काचिन्नूतनशक्तिरित्याह तत इति अतिभीषणा दर्शनमात्रात् भयकरी अत्युग्रा रौद्रस्व(ब्रह्मादीनाम्
भावा शिवानां शृगालीनां शतेन विनादिनी शतशब्दोऽनंतवाची नितरां दूत्त्वेन शिवा दूती एव च शिवदूती अग्रतः क्षेमकरी शान्तावेदमा(
ताम्रशोदरी करालाकामदा भगास्या भगमालिनी भगोदरी भगाह्वा भगगुह्यिका भगा द्वादशयोगिन्यः इति कालिकापुराणे साचेति धू(
म्रवर्णजटावृतं परिश्रमितास्ता अपराजिता च हतभाववामोवहत्वं शुंभनिशुंभयोः पार्श्वं च गच्छेत्यन्वयः गत्वेति निपातः कालमी(
त्रैतेनाभ्रवीदित्यर्थः एतच्छिवापेतयास्यास्तत्प्रादुर्भावकृतत्वं यथायाधिकोऽनंतमहत्त्वेन प्रसिद्धानां अवगतम् २३ वृहीति येचत्वम्भालिके २१
न्येदानवास्तान्प्रतिब्रूहीत्यन्वयः युद्धायमुद्रेकत्वम् २४ वचनमाह त्रैलोक्यमिति स्पष्टम् २५
रामः ॥

वलेति अवलेपो गर्वः मच्छिवाः मद्यामयाः सहचरीवृन्दानि पिशितं मांसम् २६ यत इति दूत्यमेव दौत्यं प्रज्ञाद्यण् शिवदूतीगौरा दिभ्यश्चेति ङीष् प्रख्यातिं गता एवं पदादि इति वा २७ तेऽपीति अमर्षेण सर्वतः पूरिताः यतः यं देशमाक्रम्य कात्यायनी स्थिता तं देशं जग्मुरिति अन्वयः म लसामध्ये इत्यनेन कात्यायनीत्युक्तिः २८ तत इति प्रथममादौ अग्रे पुरस्ताद् इत्यर्थः उद्धतः शकटः अनेन स्त्रीश म्यमतो हन्तव्या योग्येति विवेकराहित्येन तेषां दुश्चरितम् २९ ३० तस्येति तस्या अग्रत इति छेदः सावर्णसंधिः तथा चण्डीवत् तदा

बलावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः २६ यतो नियुक्तो दौत्येन तया देव्या शि
वः स्वयम् शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता २७ तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः अमर्षापूरिता जग्मु
र्यतः कात्यायनी स्थिता २८ ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ववर्षुरुद्धतामर्षास्तां देवीममरारयः २९ सा च तान्प्र
हितान्बाणाञ्छूलशक्तिपरश्वधान् चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः ३० तस्याग्रतस्तथा काली शूलपातविदारितान्
खट्वाङ्गपोथितांश्चारीन्कुर्वती व्यचरत्तदा ३१ कमण्डलुजलाक्षेपहतवीर्यान्हतौजसः ब्रह्माणी चाकरोच्छत्रून्येन येन
स्म धावति ३२ माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ३३ ऐन्द्रीकुलिशपा
तेन शतशो दैत्यदानवाः पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ३४ तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः वाराहमूर्त्या
न्यपतंश्चक्रेण च विदारिताः ३५ नखैर्विदारितांश्चान्यान्भक्षयन्ती महासुरान् नारसिंही चचाराजौ नादापूर्णदिगम्बरा ३६
चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ३७ इति मातृगणं क्रुद्धं मर्दयन्तं म
हासुरान् दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ३८ दैवीकृते

दैत्याः शस्त्रके दैवहीनं गंभाख्याते कालीलला टजा कुर्वती कुत्सा
भावात् ३१ कमण्डल्विति आक्षेपः प्रक्षेपः वीर्यं बलं ओजस्तेजः धावतीति सर्वत्र भूते लट् ३२ माहेश्वरीति स्पष्टम् ३३ ऐन्द्री
ति दैत्यदानवयोर्मातृतो भेदः ऐन्द्राः कुलिशपातेनेत्यर्थः ३४ तुण्डेति वाराहीत्यासां मूर्तिर्वाराहमूर्तिस्तया चक्रेणानेन वाराह्या
स्त्वेम वाराहसदृशा न तु अन्यदिति ख्याते एवंशक्तिमतो वराहस्यापि बोध्यम् ३५ नखैरिति आजौ रणे अम्बरमाकाशम् चण्डेति चण्डत्
टः सकोपो वा शिवदूत्याभिदूषिता इति तृतीया समासः अभिदूषिताः प्रापितमृत्यवः सा शिवदूती ३७ इतीति इतिएवंप्रकारैः अभ्युपायैः सं
ग्रामसाधनैर्दैत्यान्मर्दयन्तं मातृगणं दृष्ट्वा नेशुः पलायिता इत्यन्वयः मातृगणेति ब्रह्माण्याद्याः अष्टमातरः यथा ब्राह्मी माहेश्वरी चैव कौ
मारी वैष्णवी तथा वाराही नारसिंही चैन्द्री चामुण्डा मातरः स्मृता इति अमरं तेन नवार्णविधाने ३८ श्रीरामाय नमः ॥

दु॰टी॰
ना॰
२२

पलायनेति रक्तं बीजं कारणं यस्य स रक्तबीजः ३९ तदेवाह रक्तेति अस्य रक्तबीजस्य ४० स रक्तबीजः ४१ कुलिशेनेति हतस्य रक्तबीजस्य
४२ यावंत इति वीर्यं प्रभावः बलं शारीरं विक्रमः पराक्रमः तत्सादृशः ४३ ते इति समं सह अत्युग्रश्चेति शास्त्रविशेषणं समस्तम् ४४ पुनः
श्चेति ववाहेति वहिर्गतावित्यस्य रूपम् ४५ वैष्णवीति ऐन्द्र्याः शक्तेरिति प्राक् उक्तेः स्वसन्नाशं प्रापे एनं वैष्णवी चक्रेणाभिजघान गदया ता
डयामास सम्बन्धः ४६ ४७ शक्त्येति ४८ स चापीति ग्रहनादिति क्रोशैः दितेरपत्यं दैत्यः महांतोऽसुरा यस्मादिति महासुरः इति न॰

पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ३९ रक्तबिंदुर्यदा भूमौ पतत्यस्य शरीर
तः समुत्पतति मेदिन्यां तत्प्रमाणस्तदासुरः ४० युयुधे स गदापाणिरिंद्रशक्त्या महासुरः ततश्चैन्द्री स्ववज्रेण रक्तबीजम
नस्य= ताडयत् ४१ कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ४२ यावंतः पतिता
स्तस्य शरीराद्रक्तबिन्दवः तावंतः पुरुषा जातास्तद्वीर्यबलविक्रमाः ४३ ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः समं मा
तृभिरत्युग्रशस्त्रपातातिभीषणम् ४४ पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ४५
वैष्णवी समरे चैनं चक्रेणाभिजघान ह गदया ताडयामास ऐंद्री तमसुरेश्वरम् ४६ वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवैः
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ४७ शक्त्या जघान कौमारी वाराही च तथासिना माहेश्वरी त्रिशूलेन रक्तबीजं महासुर
म् ४८ स चापि गदया दैत्यः सर्वा एवाहनत्पृथक् मातॄः कोपसमाविष्टो रक्तबीजो महासुरः ४९ तस्याहतस्य बहुधा शक्तिशूला
दिभिर्भुवि पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ५० तैश्चासुरासृक्संभूतैरसुरैः सकलं जगत् व्याप्तमासीत्ततो देवा भयमा
जग्मुरुत्तमम् ५१ तान्विषण्णान्सुरान्दृष्ट्वा चंडिका प्राह सत्वरा उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ५२ मच्छस्त्रपातसंभू
तान्रक्तबिंदून्महासुरान् रक्तबिंदोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ५३ भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान् एवमेष क्षयं
दैत्यः क्षीणरक्तो गमिष्यति ५४ भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ५५ मुखे
न काली जगृहे रक्तबीजस्य शोणितम् ततोऽसावाजघानाथ गदया तत्र चंडिकाम् ५६ २ ७० समोघो

पौनरुक्त्यम् ४९ ५० तैश्चेति उत्तमं निरतिशयं सकलं जगद्व्याप्तमिति शेषः ५१ तानिति तान्विषण्णान्दृष्ट्वा त्वरासहिता चण्डिका सत्वराह
प्राह सूयमाविशीर्णं विस्तीर्णमिति शेषः एवं त्वरानावकाशविस्तारं विस्तीर्णवदनं कुर्विति कालीमुवाचेत्यपौनरुक्त्यं ५२ मच्छस्त्रेति अनेन विस्तीर्ण
वदनेन रक्तबिंदोरिति जातावेकवचनम् ततो जातान्महासुरान्मच्छस्त्रपातसंभूतान्रक्तबिंदून्भूमिमप्राप्तानेव प्रतीच्छ गृहाण ५३ किंच पालसम
[illegible] भक्षयन्ती रणे चर एवंप्रकारेणैव दैत्यः क्षयं गमिष्यति ५४ भक्ष्यमाणास्त्वया उत्पत्स्यन्तीति अपरे जाताः ५५ मुखेनेति २२

देवीशूलेने त्यादि

नचेति चिदानंदात्मकत्वादितिभावः ५७ यतस्ततइति सर्वतइत्यर्थः प्रतिविस्तीर्णवानिदंतस्य उत्तरार्द्धेनव्याचष्टे ५८ तांश्चेति
उत्तरार्द्धेनव्याचष्टे प्रतिसिमितिक्रियापेक्षयैकवचनम् ऋष्टिभिरित्यपेक्षैव ऋष्टिः भयतोधारासिः ५९ जघानेति शस्त्रसंघैः समूहैः
समाहतइतिरक्तीयानतनुः ६० नीरक्तश्चेति कात्स्न्येनपीतनिःशेषरुधिरत्वात् नीरक्तश्चसन् महीपृष्ठेपपातेत्यन्वयः ६१ तेषामि
ति तेषाममराणामसृङ्मदेनोद्धतोजातः सन्मातृगणोननर्तेत्यर्थः ६२ इति श्रीशिवभट्टसुतश्रीनागोजी

नचास्यावेदनांचक्रेगदापातोल्पिकामपि तस्याहतस्यदेहात्तुबहुसुस्रावशोणितम् ५७ यतस्ततस्तद्वक्त्रेणचामुण्डासंप्रतीच्छति मुखेसमुद्गतायेस्यारक्तपातान्महासुराः ५८ तांश्चखादाथचामुण्डापपौतस्यचशोणितम् देवीशूलेनवज्रेणबाणैरसिभिरृष्टिभिः ५९ जघानरक्तबीजंतंचामुण्डापीतशोणितम् सपपातमहीपृष्ठेशस्त्रसंघसमाहतः ६० नीरक्तश्चमहीपालरक्तबीजोमहासुरः ततस्तेहर्षमतुलमवापुस्त्रिदशानृप ६१ तेषांमातृगणोजातोननर्तासृङ्मदोद्धतः ६२ इति मार्कण्डेयपुराणेसावर्णिकेमन्वन्तरेदेवीमाहात्म्येरक्तबीजवधः ८ राजोवाच विचित्रमिदमाख्यातंभगवन्भवताममदेव्याश्चरितमाहात्म्यंरक्तबीजवधाश्रितम् १ भूयश्चेच्छाम्यहंश्रोतुंरक्तबीजेनिपातिते चकारशुम्भोयत्कर्मनिशुम्भश्चातिकोपनः २ ऋषिरुवाच चकारकोपमतुलंरक्तबीजेनिपातिते शुम्भासुरोनिशुम्भश्चहतेष्वन्येषुचाहवे ३ हन्यमानंमहासैन्यंविलोक्यामर्षमुद्वहन् अभ्यधावन्निशुम्भोथमुख्ययासुरसेनया ४ तस्याग्रतस्तथापृष्ठेपार्श्वयोश्चमहासुराः संदष्टौष्ठपुटाःक्रुद्धाहन्तुंदेवीमुपाययुः ५ आजगाममहावीर्यःशुम्भोपिस्वबलैर्वृतः निहन्तुंचण्डिकांकोपात्कृत्वायुद्धंतुमातृभिः ६ ततोयुद्धमतीवासीद्देव्याःशुम्भनिशुम्भयोः शरवर्षमतीवोग्रंमेघयोरिववर्षतोः ७ चिच्छेदास्ताञ्छरांस्ताभ्यांचण्डिकास्वशरोत्करैः ताडयामासचाङ्गेषुशस्त्रौघैरसुरेश्वरौ ८ निशुम्भोनिशितंखड्गंचर्मचादायसुप्रभम् अताडयन्मूर्ध्निसिंहंदेव्यावाहनमुत्तमम् ९ ताडितेवाहनेदेवीक्षुरप्रेणासिमुत्तमम् निशुम्भस्याशुचिच्छेदचर्मचाप्यष्टचन्द्रकम् १० ॥

कृतेसप्तशतीव्याख्यानेऽष्टमोध्यायः ८ राजोवाच विचित्रमिति राज्ञाहरणः चरितंकर्म माहात्म्यंप्रभावः समाहारद्वंद्व आ
श्रितंजनकं १ २ ऋषिरुवाच चकारेति आहवेरणः ३ हन्यमानमिति उद्वहन् धारयन् ४ संदष्टौष्ठपुटाः दंताभ्यांसंधृतोष्ठाः
तथासतिओष्ठाकारताभवति ५ ६ ततइति देव्याइतिसंबंधेषष्ठी ७ चिच्छेदेति ताभ्यामस्तान्क्षिप्तानित्यन्वयः ८ ९ ताडितेइति क्षुर
प्रः शरविशेषः चर्मफलकं अष्टसंख्याकरत्नादिरचितचन्द्राकारैर्युक्तं १०

छिन्नेइति शक्तिं क्षेपणीं देवीं प्रति अभिमुखमागतां तां देवी चिच्छेद इत्यर्थः ११ कोपेति जग्राह प्रहरणार्थं केचित् क्षेपेण प्रहरेः आयान्तं आगच्छन्तम्
तत्शूलं १२ आविध्य भ्रामयित्वा देव्या करयोस्त्रिशूलेन करणेन सापि गदा भिन्ना भस्मत्वमागता [illegible] १३ प
रशुः [illegible] निशुम्भस्य शूली सम्पादनेन पातनं १४ तस्मिन्निति प्रययौ शुम्भ इति शेषः १५ स इति तथा [illegible] प्रकारेण [illegible]।
[illegible] व्याप्य बभौ विराजितः १६ आयान्तं आगच्छन्तं १७ स्वनेनचेति [illegible] स्वनेन शब्देन समस्तदैत्यसैन्यानां तेजोवधविधायिना।

छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ११ कोपाध्मातो निशुम्भोऽथ शूलं जग्रा
ह दानवः आयान्तं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् १२ आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति सापि देव्या त्रिशूलेन भिन्ना
भस्मत्वमागता १३ ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् आहत्य देवी बाणौघैरपातयत भूतले १४ तस्मिन्निपतिते भूमौ
निशुम्भे भीमविक्रमे भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः भुजैरष्टाभिरतु
लैर्व्याप्याशेषं बभौ नभः १६ तमायान्तं समालोक्य देवी शङ्खमवादयत् ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम् १७ पू
रयामास ककुभो निजघण्टास्वनेन च समस्तदैत्यसैन्यानां तेजोवधविधायिना १८ ततः सिंहो महानादैस्त्याजितेभमहा
मदैः पूरयामास गगनं गां तथोपदिशो दश १९ ततः काली समुत्पत्य गगनं क्ष्मामताडयत् कराभ्यां तन्निनादेन प्राक्स्वना
स्ते तिरोहिताः २० अट्टाट्टहासमशिवं शिवदूती चकार ह तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ २१ दुरात्मंस्तिष्ठ तिष्ठेति व्या
जहाराम्बिका यदा तदा जयेत्यभिहितं देवैराकाशसंस्थितैः २२ शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा आयान्ती वह्निकूटा
भा सा निरस्ता महोल्कया २३ सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् निर्घातनिःस्वनो घोरो जितवानवनीपते २४ शुम्भमु
क्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः २५ ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान त
म् स तदाभिहतो भूमौ मूर्छितो निपपात ह २६ ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः आजघान शरैर्देवीं कालीं केसरिणं तथा २७

विशेषणम् १८ उपदिशः सामान्यदिग्भेदास्ताः उपदिक्शब्दवाच्याः दिशां दशानां तदाद दशेति १९ समुत्पत्य उत्पत्य पुनरवतीर्य पृथ्वीं २० अट्टाट्ट
हासं शब्दं धारिता महाहास्यम् अशिवं विरुद्धं भयदम् २१ आकाशसंस्थितैः देवैर्दानवसङ्ग्रामदर्शनाय तत्र स्थितैः २२ महोल्कयेति महा
ज्वालावृत्ताशा [illegible] यदा [illegible] २३ सिंहेति [illegible] निर्घातनिःस्वनः [illegible] जितवानिति
शुम्भसिंहनादमिति शेषः २४ शुम्भेति [illegible] २५ ततइति [illegible] २६ ततइति शुम्भमूर्छानन्तरं निशुम्भो [illegible]

23

पुनरिति दनोः पुत्रोऽपि दितिजः समानशीलत्वाद्दितिजः २८ ततइति दुर्गे संकटे आर्तैः पीडा यानां नाशिनी तिति विग्रहः २९ ततइति दै-
त्यसेनया समावृतः ३० ३१ शूलेति समायान्तम् अमरमर्दनम् वेगाविद्धेन वेगाधिक्येन ३२ ३३ स्वनवदिति प्रहस्येत्यस्य विशेषणम् ३४
तत इति उग्रमिति क्रियाविशेषणं काली शिवदूती च चखादेत्यन्वयः ३५ निराकृता ध्वस्ताः मन्त्रपूतत्वात् ३६ ३७ खण्डं खण्डं खण्डखण्डप्रकाराः
खण्डस्य खण्डस्य वा प्रकारं क्रियायां तथा कृताः आभीक्ष्ण्ये प्रकारे गुणवचनस्येति द्वित्वं वज्रेण च खण्डं खण्डं कृता इत्येव ३८ विनेशुर्मृताः नष्टाः पला-

पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः चक्रायुधेन दितिजश्छादयामास चण्डिकाम् २८ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशि-
नी चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् २९ ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् अभ्यधावत वै हन्तुं दैत्यसेनास-
मावृतः ३० तस्यापतत एवाशु गदां चिच्छेद चण्डिका खड्गेन शितधारेण स च शूलं समाददे ३१ शूलहस्तं समायान्तं निशुम्भमम-
मरार्दनम् हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ३२ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः महाबलो महावीर्यस्तिष्ठेति
पुरुषो वदन् ३३ तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि ३४ ततः सिंहश्चखादोग्रदं-
ष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथा काली शिवदूती तथापरान् ३५ कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ब्रह्मा-
णीमन्त्रपूतेन तोयेनान्ये निराकृताः ३६ माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे वाराहीतुण्डघातेन केचिच्चूर्णीकृता भु-
वि ३७ खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ३८ केचिद्विनेशुरसुराः केचिन्न-
ष्टा महाहवात् भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ३९ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये निशु-
म्भवधः ९ ॥ ॥ ऋषिरुवाच निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितम् हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः १
बलावलेपाद्दुष्टे त्वं मा दुर्गे गर्वमावह अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी २ देव्युवाच एकैवाहं जगत्यत्र द्वितीया का ममापरा
पश्य पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ३ ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बि- का

सिताः ३९ इति श्रीसप्तशतीव्याख्यायां नवमोऽध्यायः ९ ऋषिरुवाच निशुम्भमिति अब्रवीदित्यस्य देवीमिति शेषः १ बलेति बलगर्वेण दुर्विनी-
ते नं दुर्गे गर्वं मावह यात्वम् अतिमानिनी सती अन्यासां बलमाश्रित्य युद्ध्यसे इत्यन्वयः २ देव्युवाच एकैवेति एकाहं जगन्न भेददृष्ट्या परमात्मरूपा-
त्वात् अपरा अन्या मम सहायभूता द्वितीया का न कापीत्यर्थः अतश्च त्वमान्तत्वभेदो न वास्तव इत्याह पश्येति वाक्यार्थोऽस्य कर्मत्वं मद्विभूतय इ-
त्यनेन भेदं निरस्यति ३ तत इति ततो शरीरे लयं प्राप्य अभाव अनेन ब्रह्मादि आविर्भूतानां पटलस्य दर्शनेन समस्तोपादानत्वमस्याप्दे

दु. टी.
ना.
२४

देव्युवाच अहमिति अहं विभूत्या बहुभी रूपैर्यद्बहुरूपत्वमास्थिता तद्बहुरूपत्वं मया संहृतं तस्मादहमेकैव तिष्ठामि त्वमपि रणे स्थिरो भवेत्यर्थः
अनेनापि तद्देव हृदीकृतम् ५ ऋषिरुवाच तत इति पश्यतामित्यत्रानादरे षष्ठी ६ भूयः सहत्व ७ ८ इयं च तत्तत्कारणत्वोच्चारणं च तदा हि भू
तेयुधामस्त्राणामिति ९ ततस्तत्कुपिता धनुः इषुभिः सह १० छिन्ने इति तथा तेन प्रकारेण छिन्ने धनुषि शक्तिमन्वयः ११ तत इति शक्तिच्छेद
नंतरमित्यर्थः भानुमदिति किरणयुक्तमित्यर्थकम् खड्गस्य शतचन्द्रस्य चर्मणस्य विशेषणं तदा शुद्धकाले दैत्यानामधिपेश्वर इति गमक १२

देव्युवाच एकैवाहं जगत्यत्र द्वितीया का ममापरा पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ३ ततः समस्तास्ता देव्यो ब्रह्माणी ४८
प्रमुखा लयम् तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ४ देव्युवाच अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता तत्संहृतं म
यैकैव तिष्ठाम्याजौ स्थिरो भव ५ ऋषिरुवाच ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः पश्यतां सर्वदेवानामसुराणां च दारुणम्
६ शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः तयोर्युद्धमभूद्भूयः सर्वलोकभयङ्करम् ७ दिव्यान्यस्त्राणि शतशो मुमुचे यान्य
थाम्बिका बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ८ मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी बभञ्ज लीलयैवोग्रहुङ्कारो
च्चारणादिभिः ९ ततः शरशतैर्देवीमाच्छादयत सोऽसुरः सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः १० छिन्ने धनुषि दैत्ये
न्द्रस्तथा शक्तिमथाददे चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ११ ततः खड्गमुपादाय शतचन्द्रं च भानुमत् अभ्यधावत
तां देवीं दैत्यानामधिपेश्वरः १२ तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् १३ हताश्वः
स तदा दैत्यश्छिन्नधन्वा विसारथिः जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः १४ चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः त
थापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् १५ स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः देव्यास्तं चापि सा देवी तलेनोरस्यताडयत्
१६ तलप्रहाराभिहतो निपपात महीतले स दैत्यराजः सहसा पुनरेव तथोत्थितः १७ उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः
तत्रापि सा निराधारा युयुधे तेन चण्डिका १८ नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम् १९
ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह उत्पात्य भ्रामयामास चिक्षेप धरणीतले २० स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः अभ्य

[illegible]

त्वात्समासः २१ चर्मेति चेतनाश्वसारथ्योः सङ्ग्रहः १३ तदा इ हताश्व इति १४ स मुष्टिमिति देव्या हृदये इत्यन्वयः तलेन प्रहस्ततलेन लि
कचपेटः १५ १६ सहसा तर्कितम् १७ उत्पत्येति भूमेः सकाशादूर्ध्वं गत्वा उच्चैर्गगनमित्यन्वयः आस्थितः आश्रितवान् निराधारा स्वप्रयु
क्तेन स्थानाभावे देहहीना तेन शुम्भेन १८ नियुद्धं बाहुयुद्धं तद्धि शोभनत्वात् प्रथममिति निरुपमकम् सिद्धादयस्तयोर्विशेषः मुनयो ऋषयः १९
उत्पात्य कण्ठकवडपरिहितमुत्पत्य तत्सम्बेचरणौ गृहीत्वा भ्रामयामास [illegible] रणीतले विक्षेपेत्यर्थः २० वेगितः वेगवान् २१ ॥

२२ विक्षतः क्षतयुक्तः चालयन्निति स्पष्टमावार्थः २३ प्रसन्नं प्रकाशवत् स्वास्थ्यं प्रसन्नाविलत्वम् २४ उत्पातेति उत्पातसूचका मेघाः उ
त्पातः शुभाशुभदेवशुभं च उल्कादिजनितेजः प्राक् शुम्भवधात् तथा सद्वत्सरितो मार्गवाहिन्यः न स्वैर्वृत्तमार्गगामिन्यः आसन् तत्र शुम्भे २५
२६ पुण्या पवित्रजलाः २७ जज्वलुरिति अग्नयश्चाग्रवनीयादयः शान्ताः सौम्याः सन्तो जज्वलुः याः प्राग्दिग्जनिताः स्वनाः उत्पातसूचकाः
स्फुटनामा दिशः शान्ता याता इति २८ [illegible] तथा शूले [illegible] तथा [illegible] धनुर्बाणा
[illegible] देवी [illegible] नानारत्नसमाकीर्णा वेदविद्याविनोदिनी आषाढे नवरात्रेषु

न मायां ततो देवी सर्वदैत्यजनेश्वरम् । जगत्यां पातयामास भित्त्वा शूलेन वक्षसि २२ स गतासुः पपातोर्व्यां देवीशूलाग्रवि-
क्षतः । चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् २३ ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि । जगत्स्वास्थ्यमतीवाप निर्म
लं चाभवन्नभः २४ उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः । सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते २५ ततो देवगणाः
सर्वे हर्षनिर्भरमानसाः । बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः २६ अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः । ववुः पु
ण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः । जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः २८ इति मार्कण्डेयपुराणे सावर्णि
के मन्वन्तरे देवीमाहात्म्ये शुम्भवधः १० ऋषिरुवाच देव्या हते तत्र महासुरेन्द्रे सेन्द्राः सुरा वह्निपुरोगमास्ताम् । कात्यायनीं तुष्टु
वुरिष्टलाभाद्विकासिवक्त्राब्जविकासिताशाः १ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य । प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य २ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि । अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्
स्नमलङ्घ्यवीर्ये ३ त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमासि माया । सम्मोहितं देवि समस्तमेतत् त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ४

अशुभनिवर्तिनीति इति श्रीशिवभट्टसुत श्रीगर्भजनार्दन [illegible] भट्टकृते सप्तशतीव्याख्याने दशमोऽध्यायः १० ॥ ऋषिरुवाच देव्ये
ति तत्र यद्देवह्निपुरोगमाः सुराः कात्यायनीमित्यनेन परस्परमासामैक्यं सूचयति इष्टस्य शुम्भादिवधस्य लाभात् प्राप्तेः [illegible] विका
सीति विकस्वराणि वक्त्राणि येषां ते तथा [illegible] विकासिताः प्रकाशिता आशा याभिः १ देवीति प्रपन्ना भक्ताः आर्तिहरे प्रसीदेति द्विरुक्तिः चरा
चरस्य निर्माणादौ त्वमीश्वरी स्वतन्त्रा इतरत्स्वरूपं [illegible] २ आधारभूतेति तत्र हेतुर्महीरूपेण स्थितिः अपां स्वरूपस्थितया [illegible]
स्वरूपेण स्थितया [illegible] आप्यायते [illegible] ३ त्वमिति [illegible]
[illegible] शक्तिः [illegible] माया विद्या [illegible] त्वं प्रसन्ना [illegible] प्रसादा

दु॰ टी॰ ना॰ २५

विद्या इति अंगानि वेदाश्चत्वारो मीमांसान्यायविस्तरम् पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश आयुर्वेदो धनुर्वेदो गांधर्वोऽर्थशास्त्रैः सहाष्टादश
भेदाः अंशाः सकलाः सर्वाः चतुःषष्टिकलोपेताः पातिव्रत्यसौंदर्यतारुण्याद्युपेताः समस्ताः स्त्रियोऽपि त्वदंशाः स्त्रियः इत्युपलक्षणमित्याह त्वयैकयेति
निःपूरितमनेन विश्वमात्मना एवं च त्वत्तः पृथग्भूतस्याभावात् स्तोतव्यमेव तु स्तुति विषयेषु परा परा श्रेष्ठा उक्तिः वाणी यद्वा च या उक्तिः स्तुतिरूपा स्तुतिः का ते इत्यर्थः
यद्वा उक्तिरूपा त्वमेवातः का ते स्तुतिः ५ पुनरपि स्तुतेरशक्यत्वमाह सर्वेति सर्वभूता विश्वात्मिका देवी सा त्वं यदा स्तुता स्वर्गमुक्त्योः प्रकर्षेण दा
त्रीति यदा त्वं स्तुता तदा त्वत्स्तुतये परमा अधिका उक्तयः का वा भवेत न का अपीत्यर्थः ६ तथापि यथामत्याह सर्वस्येति बुद्धिनिश्चयात्मके
ज्ञाने तद्द्वारेव च स्वर्गापवर्गदे त्वं नारायणस्य विष्णोः शक्तिर्नारायणी यद्वा नारस्य जीवसमूहस्यायनी स्थानभूता तद्रूपा तत्संबोधने तव ७

विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु त्वयैकया पूरितमंबयैतत् का ते स्तुतिः स्तव्यपरापर
रोक्तिः ५ सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ६ सर्वस्य बुद्धिरू
पेण जनस्य हृदि संस्थिते स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ७ कलाकाष्ठादिरूपेण परिणामप्रदायि
नि विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ८ सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके शरण्ये त्र्यंबके गौरि
नारायणि नमोऽस्तु ते ९ सृष्टिस्थितिविनाशानां शक्तिभूते सनातने गुणाश्रये गुणमये नारायणि नमोऽस्तु ते १०

कलेति कला त्रिंशत्काष्ठा अष्टादश निमेषाः काष्ठा आदिना क्षणमुहूर्तादयः परिणामो जन्मवृद्धिनाशावस्थाविशेषः तेन कालरूपात्वं मदे
व तु न नाद विश्वस्योपरतौ नाशे शक्ते नाशशक्तिमति इत्यर्थः कालस्यैव जगद्भक्षकत्वात् ८ सर्वमंगलेति मंगलानां मंगलरूपे शिवे कल्या व
ल्याणकर्त्रि शरण्ये शरणार्हे त्र्यंबके त्रिनेत्रे गौरि गौरवर्णे अनेन शिवावतारस्याधिनितम् नहि कोटे चौरुणाम् सर्वाणि हृदयस्थानि मंगलानि
शुभानि च ददाति चेति ता सा कौ तेन सा सर्वमंगला अंकानामाकृतिरूपणी मंगल्या तेन सा स्मृता २ शिवा मुक्तिः समाख्याता तत्प्रदत्वाच्छिवा
स्मृता ३ धर्मादीन्त्रितिलावस्मात्सर्वलोकस्य यच्छति अतो देवी समाख्याता लोके सर्वार्थसाधिका ४ विद्याहि भयहो रक्ष शरण्याः स्मर
णाद्यतः शरण्या तेन सा देवी मुनिभिः परिकीर्तिता ५ सोमसूर्यानला ह्येता त्र्यंबका सा स्मृता बुधैः योगाग्निदग्धदेहाया पुनर्नीता हि
मालये शंखेन्दुकुन्दधवलात्तेन गौरीति सा स्मृता ७ जलाय नाना रायानामत्युग्रायजनापि वा नारायणी समाख्याता नराणां प्रवर्तिका व
स्मत्दृष्टा सर्वेषु भूतेषु नित्यं नारायणः दृश्यावायान्नमिदं सर्वं जगत्स्थावरजंगममिति अस्य श्लोकस्य समाप्तिपाठो महाफलद इति कालिकायाम्
ते ९ सृष्टीति आद्यार्थेन ब्रह्मादीनां सृष्ट्यादिशक्तिरूपमेवे सनातने नित्ये गुणानां सत्त्वादीनामाश्रयभूते अत एव गुणमये आविद्यमानत्र २५

व

25

शरणेति दीनाः सर्वैरिष्टैः दुःखभाजः आर्ताः तस्करादिपीडिताः परायणे तत्परे तदुपपादकमार्तिहरे इति यत्नपूर्वैः पीडयाद्भ्रीत्यर्थः ११ हं
सेति हंसयुक्तविमानस्थिते ब्रह्माणीरूपधारिके कुशजले तस्यायं कौशः कमण्डलुः तदंभसः क्षरिके सिंचिके १२ त्रिशूलेति माहेश्वरीस्वरूपेण
तिपूर्वो ईनात्वृषि १३ मयूरेति मयूरकुक्कुटैर्वृतत्विष्ठ तेन वृते कुक्कुटः कुक्कुभः पिच्छ उत्रैव चरणायुधः इति मेदिनी मयूरपिच्छध्वजवतीत्यर्थः ध
नेन पिच्छितिव रणामुक्ति तेन समावृते तिहृरिवंशोक्तेः अनघे अघरहिते कुमारशक्ते रिवरूपं संस्थानमवयवसन्निवेशस्य यस्याः १४ शंखेति
शंखादीनि गृहीतानि परमायुधानि यया १५ दंष्ट्रेति त्रैलोक्यत्राणायसम्यक हिते समोमस्य हिते लोपः १६ १७ महावज्रइति महद्वज्रं यस्याः

शरणागतदीनार्तपरित्राणपरायणे सर्वस्यार्तिहरे देवि नारायणि नमोस्तु ते ११ हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि कौशां
भः क्षरिके देवि नारायणि नमोस्तु ते १२ त्रिशूलचन्द्राहिधरे महावृषभवाहिनि माहेश्वरीस्वरूपेण नारायणि नमोस्तु ते १३ मयूर
कुक्कुटवृते महाशक्तिधरेऽनघे कौमारीरूपसंस्थाने नारायणि नमोस्तु ते १४ शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे प्रसीद वैष्णवी
रूपे नारायणि नमोस्तु ते १५ गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे वराहरूपिणि शिवे नारायणि नमोस्तु ते १६ नृसिंहरूपेणो
ग्रेण हन्तुं दैत्यान्कृतोद्यमे त्रैलोक्यत्राणसहिते नारायणि नमोस्तु ते १७ किरीटिनि महावज्रे सहस्रनयनोज्ज्वले वृत्रप्राणहरे चैन्द्रि
नारायणि नमोस्तु ते १८ शिवदूतीस्वरूपेण हतदैत्यमहाबले घोररूपे महारावे नारायणि नमोस्तु ते १९ दंष्ट्राकरालवदने शिरो
मालाविभूषणे चामुण्डे मुण्डमथने नारायणि नमोस्तु ते २० लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे महारात्रि महाविद्ये नारा·
२१ मेधे सरस्वति वरे भूति बाभ्रवि तामसि नियते त्वं प्रसीदेशे नारायणि नमोस्तु ते २२ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते भ
येभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते २३ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तु ते २४ ज्वा
लाकरालमत्युग्रमशेषासुरसूदनम् त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते २५ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् सा घं

१८ शिवेति हतो दैत्यानां महाबलं यया सा १९ २० देलक्ष्मि महाविद्या उपनिषत् श्रद्धा आस्तिक्यबुद्धिः पुष्टिः सद्भिः स्वधे महती अविद्या सर्वाव
रणसमर्था महामोहस्वरूपे २१ मेधइति मेधा धारणावती बुद्धिः सरस्वती वाग्देवता वरे श्रेष्ठे भूतिः संहननप्रधाने बाभ्रवि सोगुणाभावः प्र
तेन सात्त्विकीत्व बभ्रू रजोगुणस्तद्युक्ते तामसि तमोगुणयुक्ते इदं सकलशास्त्रभेदाभिप्रायेण नियतिरदृष्टं तद्रूपे ईशा समर्थे २२ सर्वेति दे
वीस्वरूपे सर्वतः प्रसादनेन आशीः याचे २३ सर्वभूतेभ्यः सर्वभूतविकारेभ्यः प्राणिभ्यश्च कात्यायनि तदाश्रयसंभवे २४ ज्वालेति नो अस्मान्
भीतेर्भयात् २५ हिनस्तीति अतः श्रीणीमातावात्सल्यतानि नेनः अस्मान् पापेभ्यः पातु इत्यर्थः अतिनेपवाह्यच २६ ॥ रामायनमः

दु॰टी॰ मा॰ २६ असृग्वेति चर्चितो लिप्तः करे हस्ते उज्ज्वलयति क्रूरैः किरणैः खड्गः शोभा २७ रोगानिति अभीष्टान् प्रियान् अपहंसि नाशयसि रुष्टा सती विपत् इष्टवियो
गजन्मा त्वामाश्रिता अन्येषामाश्रयतां प्रयान्ति २८ एतदिति कदनं नाशः धर्मद्विषां सुराः अद्य अधुना आत्ममूर्तिमेव अनेकरूपैः अम्बा
त्वमम्बिका यया दितिजानां अभेदेन तनीया बहुधा बहुप्रकारं अन्या त्वदितरा का न कापीत्यर्थः २९ विद्यास्विति विद्यासु ज्ञानेषु उपायभूतानि
यानि शास्त्राणि तेषु मन्वादिकेषु विवेकदीपेषु उपनिषत्सु आद्येषु वाक्येषु कर्मकाण्डपरवेदवाक्येषु सत्स्वेव ममत्वगर्ते दाय महा
धकारे संसारे एतद्विश्वं त्वदन्या का अतीव विभ्रामयति न कापीत्यर्थः ३० रक्षांसीति नागाः सर्पाः अरयः शत्रवः दस्यवः चौराः दावो वा

असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः शुभाय खड्गो भवतु चंडिके त्वां नता वयम् २७ रोगानशेषानपहंसि तुष्टा रुष्टा तु का-
मान्सकलानभीष्टान् त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति २८ एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि म-
न्या ३ हासुराणाम् रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वाम्बिके तत्प्रकरोति कान्या २९ विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या म-
मत्वगर्तेऽतिमहान्धकारे विभ्रामयत्येतदतीव विश्वम् ३० रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र दावानलो यत्र
तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ३१ विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम् विश्वेशवन्द्या भ-
वती भवंति विश्वाश्रया ये त्वयि भक्तिनम्राः ३२ देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः पापानि स-
र्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ३३ प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि त्रैलोक्यवासिनामीड्ये
लोकानां वरदा भव ३४ देव्युवाच वरदाहं सुरगणा वरं यन्मनसेच्छथ तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ३५ देवा ऊचुः स- २८
र्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ३६ देव्युवाच वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशति-
मे युगे शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ३७

नेत्यथाब्धिमध्ये यत्र रौद्रा मत्स्यादयः
यः ३१ यतस्त्वं विश्वेश्वरी अतो विश्वं परिपासि यतस्त्वं विश्वात्मिका अतस्त्वं तद्धारयसि यतो भवती विश्वेशानां ब्रह्मादीनामपि वन्द्या अतः तत्र
विभक्तिनम्राः ते विश्वाश्रया भवन्ति ३२ देवीति हे देवि नोऽस्मान् सद्यः तत्क्षणमेव शत्रुभीतेः पालय यथा अधुनैव असुरवधात् पालिताः
न्तवत्पालितेत्यर्थः सर्वजगतां पापानि आशु शीघ्रं शमनं नय उत्पातानां पाकः फलदानकालस्तेन जनितान् महोपसर्गान् महारोगान् प्रशमन
य ३३ प्रणतानामिति ईड्ये स्तव्ये ३४ देव्युवाच वरदेति यं वरं यमभीप्सितमर्थं वृणुध्वं प्रार्थयध्वं ३५ देवा ऊचुः सर्वाबाधेति सर्वाबाधाना-
बाधेत्यर्थः इदं वैरिविनाशनं सर्वविशेषणं एवमेव शुम्भादिनाशवदेव ३६ देव्युवाच वैवस्वत इति अन्तरे मन्वन्तरे अष्टाविंश- २६
तितमे अष्टाविंशतिसंख्याके द्वापरनामके दशे युगे चतुर्युगेऽन्तर्गते कलिद्वापरसंधावन्ययोरुत्पत्तिः ३७ ॥ रामाय नमः

नैवेति नंदगोपगृहे एषा महालक्ष्म्यंशभूता नंदा भगवती नाम या भविष्यति नंदजा कनकोत्तमकांतिः सा सुकांतिकनकांबरा कमलांकुश
पाशाब्जैरलंकृतचतुर्भुजा इंदिरा कमला लक्ष्मीः सा श्री रुक्मांबुजासनेति रहस्योक्तेः अस्याः शौरिगेहे नवमे प्रादुर्भावः ३८ पुनरपीति इयमपि
द्वापरे तीर्णेनैव च तद्युगे वर्तमाने कलौ वैप्रचित्तान् विप्रचित्तिवंश्यान् ३९ ४० तत इति एषा रक्तदंतिका कालांशभूता अत्र दंतेषु पलत्वं
केशाद्युपमावर्णनमस्याः अत एवास्या रक्तचामुंडेति नामव्यवहारः जपाकुसुमवर्णाभा रक्तांबरविभूषणा रक्तायुधा रक्तनेत्रा रक्तके
शातिभीषणा रक्तदंती रक्तनखा रक्तदंष्ट्रातिभीषणा वसुधेव विशाला सा सुमेरुयुगलस्तनी स्तनौ लंबावतिस्थूलौ कर्कशावतिमानकौ स्वभ

नंदगोपगृहे जाता यशोदागर्भसंभवा ततस्तौ नाशयिष्यामि विंध्याचलनिवासिनी ३८ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले अ
वतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान् ३९ भक्षयंत्याश्च तानुग्रान्वैप्रचित्तान्महासुरान् रक्ता दंता भविष्यंति दाडिमीकुसुमोपमाः ४०
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः स्तुवंतो व्याहरिष्यंति सततं रक्तदंतिकाम् ४१ भूयश्च शतवार्षिक्यामनावृष्ट्यामनंभसि मु
निभिः संस्तुता भूमौ संभविष्याम्ययोनिजा ४२ ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् कीर्तयिष्यंति मनुजाः शताक्षीमिति मां
ततः ४३ ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ४४ शाकंभरीति विख्यातिं त
दा यास्याम्यहं भुवि तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरं ४५ दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति पुनश्चाहं यदा भीमं रूपं कृत्वा हिमा

काल्यालये देवाः रक्तमालिं तिष्ठति खड्गं च पानपात्रं च मुसलं लांगलं करैः बिभर्तीति यामलोक्तेः अत्र सर्वज्ञारसमिति निर्देशः परस्परमपि
शाकंभरीनामभेदाभिप्रायेण ४१ भूयश्चेति अनंभसि कूपादिजलशून्यायामपीत्यर्थः अयोनिजा यथैव दानीं पार्वती देहाद्वाविर्भावः एवमेवास्याः
४२ यद्यस्मान्मुनीन्निरीक्षिष्यामि तत्तस्मात् ४३ वैवस्वतमन्वंतरे एव चतुर्विंशतितमे युगे शताक्षी शाकंभर्यवतारः तस्मिन्नेवांतरे शकचत्वारिंशत्त
मे युगे इति लक्ष्मीतंत्रोक्तेः तत्रैव दुर्गनामासुरवधः शाकंभरीस्तवे तथा शाकंभरी शताक्षी अत एवास्मृते भूतिमन्नपानोद्भवा रतिमिति च तत्रैव कं
भवर्णा महालेवा नीलोत्पलविलोचना गंभीरनाभिस्त्रिवलीतनूदरा मनोहरा सुकर्कशा चेद्रभासा तन्वी पीनपयोधरा चतुर्भुजा विशालाक्षी वा
णमहोत्पलत्था पुष्पपल्लवमूलादिफलशाकसमन्वितान् प्राणिनां जीविनार्थाय बिभर्तीति यामले ४४ शाकंभरीति एषा पार्वत्यंश एव शा
कंभरी शताक्षी सा दुर्गा सैव प्रकीर्तिता उमा गौरी सती चंडी कालिका सा च पार्वती शाकंभरी नीलवर्णेत्याद्युक्तेः दुर्गो नामासुरः तत्रैव शाकंभर्यवतारे
व पंचमूलकरी शाकफलकांडाधिरूढकाः तत्कुष्मांडकं चेति शाकस्त्राविंशसततम् यद्दुर्गमासुरघ्नः पुरुषाग्रे स्मृतिरिति लक्षणोक्तेश्चरः अस्य वधे
कालरात्रिर्हंतीति बोध्यम् तदा भ्रमरा मा स्त्रि उराविपरसुंदरी कामाक्षा जमिनी च मलासुतीश्चारदाक्षिमसामान्याद्याः शाकंभर्यामले ४५ दु

भक्षयिष्यामीत्यत्र ‥ इत्यविशिष्टं ४७ भीमेति भीमापि नीलवर्णा करालदशनभास्वरा चंद्रहासं च डमरुं शिरः पात्रं च बिभ्रती एकवीरा कालरा
त्रिर्निद्रा तृष्णा दुरत्ययेत्यादिभिः इयं कालरात्रिरेव [illegible] भीमावतार इति लक्ष्मीतंत्रे इयं चैव [illegible] ग्राह्या
[illegible] ४८ तदेति भ्रामरं [illegible] असंख्येयाः षट्पदा यस्मिंस्तद्रूपं तत् ४९ भ्रामरीति तेजोमण्डल[illegible] भ्रामरी चित्रकं
[illegible] चित्रभ्रमरपाणिः [illegible] महाकाली [illegible] केरि [illegible] एव सर्वतः सर्वत्र [illegible]
तेन रूपेण [illegible] भ्रामर्यवतार इति लक्ष्मीतंत्रे इत्थमित्याद्यर्धत्रयं स्पष्टम् ५० तदेति स्पष्टम् ५१ इति श्रीशिवभट्टसुतनागोजीभट्टकृते
नागोजीभट्टकृते सप्तशतीव्याख्यानेएकादशोध्यायः ११ देव्युवाच एभिरिति मधुकैटभवधादिलक्षणैरित्यर्थः सकलामैहिकीं पारलौकि

[illegible]ऋषिभिः [illegible]मुनीनां त्राणकारणात्। तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ४१ भीमादेवीति विख्यातं तन्मे नाम भवि
ष्यति यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ४८ तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदं त्रैलोक्यस्य हितार्थाय वधिष्यामि मह
हासुरम् ४९ भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः इत्थं यदा यदा बाधा दानवोत्था भविष्यति तदा तदावतीर्याहं करिष्या १४
म्यरिसंक्षयम् ५१ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये नारायणीस्तुतिः ११ देव्युवाच एभिः स्तवैश्च मां नित्यं
स्तोष्यते यः समाहितः तस्याहं सकलां बाधां शमयिष्याम्यसंशयम् १ मधुकैटभनाशं च महिषासुरघातनम् कीर्तयिष्यन्ति ये
तद्वद्वधं शुम्भनिशुम्भयोः २ अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ३ न तेषां दुष्कृतं किं
चिद्दुष्कृतोत्था न चापदः भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ४ शत्रुतो न भयं तस्य दस्युतो वा न राजतः न शस्त्रानलतोयौघा
त्कदाचित्संभविष्यति ५ तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं हि तत् ६ उपसर्गानशे स्दा=
षांस्तु महामारीसमुद्भवान् तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ७

कीं च समाहितो नम्रमनाः १ तदेवाह मधुेति २
श्रोष्यन्ति चान्विष्यन्ति अष्टम्यामित्यादि श्रवणकालकथनम् ३ नेति दुष्कृतं पापं दारिद्र्यशत्रवात् घ्नन्तीति दारिद्र्यम् ४ शत्रुत इति
नशस्त्रेति सं[illegible]विषयम् ५ तस्मादिति सदा नित्यं पठितः तन्माहात्म्यं स्वस्ति कल्याणं तस्यायनं मार्गः ६ उपेति माहा
त्म्यं कर्तृ सहामारी भूमस्थ[illegible]ताम[illegible]करी देवता ततः समुद्भवो येषां तान् उपसर्गानुपद्रवान् तथा त्रिविधं व्याधिरा
गद्वेषादिरूपम् आध्यात्मिकम् भूतप्रेतादिजभयघ्नमादि आधिभौतिकम् देवकृतवज्रपातदारिद्र्याद्याधिदैविकम् तद्रूपमुत्पा २७
तमनिष्टम् दिव्यं भौमं मांतरिक्षं वेति त्रिविधमुत्पातं च ॥ ७ ॥ श्रीमायपरमात्मने नमो नमः ॥

यत्रैतेति यत्रायतने गृहे मम वृत्तं स्तोत्रं पठ्यते सम्यक् अर्थावधारणपूर्वकं अस्खलितवर्णादिना ८ बलीति बलिप्रदाने देवतोद्देशेन पश्वा
द्युपहारः पूजा गंधादिनार्चनम् अग्निकार्यं देवीदैवत्यो होमः महोत्सवः उत्सव जन्मविवाहादि उच्चार्यमिति द्विजैः पाठ्यं ९ फलमाह जान
तेति जानता विधिज्ञेन अजानताज्ञेन वलिसहितां पूजां तथा वैधावैधप्रकारेण मन्माहात्म्योदीरणाद्धोमाद्यत् यथाकथंचिदपि कृत ।
मेतत्प्रतीच्छिष्यामि स्वीकरिष्यामीत्यर्थः चवर्गमध्यः पाठः गणे वा जुलकोक्तेः प्रतीच्छधातुर्ग्रहणार्थः १० शरदिति शरत्काले आश्वि
नशुक्लप्रतिपदमारभ्य क्रियमाणा दुर्गोत्सवरूपा या च वार्षिकी वर्षं भाव्या वर्षादौ लाट्टालिकः तेन चैत्रशुक्लप्रतिपदमारभ्य क्रियमाणा चे

यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ८ बलिप्रदाने पूजायामग्निकार्ये महोत्सवे
सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च जानताजानता वापि बलिपूजां तथा कृताम् प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृ
तम् १० शरत्काले महापूजा क्रियते या च वार्षिकी तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ११ सर्वाबाधाविनिर्मुक्तो धन
धान्यसुतान्वितः मनुष्यो मत्प्रसादेन भविष्यति न संशयः १२ श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः पराक्रमं च युद्धेषु
जायते निर्भयः पुमान् रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते नंदते च कुलं पुंसां माहात्म्यं मम शृण्वताम् १४ शांतिकर्मणि सर्व
त्र तथा दुःस्वप्नदर्शने ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम १५ उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः दुःस्वप्नं च नृ
भिर्दृष्टं सुस्वप्नमुपजायते १६ बालग्रहाभिभूतानां बालानां शान्तिकारकम् संघातभेदे च नृणां मैत्रीकरणमुत्तमम् १७ दुर्वृ
त्तानामशेषाणां बलहानिकरं परम् रक्षोभूतपिशाचानां पठनादेव नाशनम् १८ सर्वं ममैतन्माहात्म्यं मम सन्निधिकारक
म् पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः १९ विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्स

त्यर्थः श्रुत्वेति पठनस्याप्युपलक्षणम् एवमग्रेऽपि ११ सर्वाबाधास्वाबाधा चेत्यर्थः १२ उत्पत्तयः प्रादुर्भावाः द्वितीयार्थे प्रथमा प
राक्रमं चेति एवोन्वयि युद्धेष्वित्युपलक्षणम् १३ उपपद्यते प्राप्यते कुलं च नंदति वर्धते १४ शांतिकर्म उपसर्गादिनिवर्तकं कर्म तस्मिन् तत्स्या
नेत्यर्थः अन्यत्सुगमो विषयार्थे १५ तदेव विवृणोति उपसर्गा इति दुःस्वप्नस्य स्वप्नशास्त्रोक्तफलेन त्रेसकावपि १६ बालग्रहाः स्कन्दाद्याः
संघातभेदे मैत्री विग्रहे १७ दुर्वृत्तानां दुष्टानां व्याघ्रसर्पचौरादीनाम् १८ पठितमात्रादिश्लोकद्वयमेकान्वयि पशुबलिः अर्घ्यः ऽर्घ्यः आ
पः क्षीरं कुशाग्राणि दध्यक्षततिलानि च यवाः सिद्धार्थकाश्चैव ह्यष्टांगोऽर्घः प्रकीर्तितः १९ विप्राणामिति प्रोक्षणीयैः पंचामृताभिषेका
दिभिः अन्यैर्विविधा भोगाः स्रगादयः प्रदानैः मदुद्देशेन विप्रेभ्यो दीयमानैर्वासोऽलंकारादिभिः एतैरहर्निशं क्रियमाणैर्वत्सरेण प्रीतिर्भवति २०

सास्मिन्त्सुचरिते सकृच्छ्रुते इत्यर्थः श्रवणस्य फलं तत्पठनस्यापि श्रवणे अधिकफलत्वमिति कश्चित् श्रुतमित्याद्युत्तरान्वयि २१ मम जन्म
नां कीर्तनं श्रुतं सदित्यर्थः युद्धेष्विति पूर्वान्वयि २२ तस्मिन्निति युष्माभिः स्तुतयो याश्चेत्यनेन नारायणीसूक्तं नमो देव्यादिकं च संगृह्य
तथा ब्रह्मणा ऋषिभिः सह याश्च युष्माभिः कृता मधुकैटभवधे ब्रह्मणा कृतेत्यर्थः यथा तत्तत्तोषकारिणीत्वमपि कृतेन तथा प्रागेव निरूपितम् कृ
ताश्चेति च दृष्टान्तार्थं कस्य लक्ष्मीमेवैकवाक्यतादिवपूर्वं पूर्वोक्तानि सर्वाणि लोकाः एव कृतान्यानादीनीति बोध्यम् २२ ब्रह्मणेति ते
ष्वादिमादिरात्रिस्तुतिरूपा शुभां मोक्षाभ्युदयसाधनीं प्रयच्छन्तीति ददति अरण्येत्यादि श्लोकचतुष्टयमेकान्वयि प्रान्तरे दूरशून्यमार्गे अर
ण्ये इत्यस्य दावाग्नीत्यादिनान्वयः प्रान्तरे इत्यस्य दस्युभिरित्यादिनान्वयः केवलप्रान्तरे वा दस्युभिर्गृहीतो वा २४ दस्युभिरिति शून्ये निर्ज

प्रीतिर्मे क्रियते सास्मिन्सकृत्सुचरिते श्रुते श्रुतं हरति पापानि तथारोग्यं प्रयच्छति २१ रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं म
म युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् २२ तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः
२३ ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिम् अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः २४ दस्युभिर्वा वृतः शून्ये गृहीतो वापि
शत्रुभिः सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः २५ राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोपि वा आघूर्णितो वा वातेन स्थि
तः पोते महार्णवे २६ पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे सर्वाबाधासु घोरासु वेदनाभ्यर्दितोपि वा २७ स्मरन्ममैतच्च
रितं नरो मुच्येत संकटात् मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा दूरादेव पलायन्ते स्मरतश्चरितं मम २८ ऋषिरुवाच इत्युक्त्वा
सा भगवती चण्डिका चण्डविक्रमा २९ पश्यतामेव देवानां तत्रैवान्तरधीयत तेपि देवा निरातङ्काः स्वाधिकारान्यथा पुरा ३० यज्ञ
भागभुजः सर्वे चक्रुर्विनिहतारयः दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ३१ जगद्विध्वंसिनि तस्मिन्महोग्रेतुलविक्रमे नि
शुम्भे च महावीर्ये शेषाः पातालमाययुः ३२ एवं भगवती देवी सा नित्यापि पुनः पुनः संभूय कुरुते भूप जगतः परिपालनम् ३३

ने इत्युत्तरान्वयि वनहस्तिभिरित्यस्य लोवेनेति शेषः २५ राज्ञेति क्रुद्धेन राज्ञा वध्यत्वेनाज्ञप्त इत्यन्वयः सर्वत्र वा समुच्चये महा
र्णवे पोते स्थितो वातेनाघूर्णितः आकुलितश्च २६ पतत्स्विति सर्वाबाधासु महापीडासु वेदनया दुःखेनाभ्यर्दितश्च २७ स्मरन्निति
मुच्येतेति क्रियाकर्तृपदमितरत् संकटं मुदुःखम् उत्तरार्धं पूर्वान्वयि २८ दूरादेवेति मम चरितं स्मरतः मम प्रभावाद्दूरात्पलायन्ते इत्यन्वयः इत्याद्यस्य
ऋषिरुवाचेत्यादिः चेडारूपाणः २९ पश्यतामिति अनादरे षष्ठी निरातङ्का निर्भयाः ३० दैत्याः शेषदैत्याः ३१ आययुः प्राविशन्
३२ उपसंहरति एवमिति संभूय दृश्यशरीरा प्रादुर्भूय अन्तरधीयतेति क्रियाकर्तृपदमितरत् ३३ ॥ [illegible] २८

व्याप्तमिति महतोब्रह्मादीनपिकस्यतुइति· अधिकारेषुप्रवर्तयति· सामहाकाली· तयामहाकालेप्रलये महामारीसंहारक्रियातद्रूपयाव
येतद्व्याप्तमित्यन्वयः ३५ सैवेति कालेप्रलये महामारीसंहारशक्तिः सृष्टिः सर्गशक्तिः अजाजन्महीनाकालेस्थितिकाले सनातनीनाश
हीना ३६ भवकालेसंपत्समये वृद्धिप्रदेतिलक्ष्मीविशेषणम् अभावेविपत्काले ३७ पुष्पैः धूपगंधदीपाद्यैःसंपूजितेत्यर्थः ३८ इ
तिश्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेसप्तशतीव्याख्यानेद्वादशोऽध्यायः १२ ऋषिरुवाच एतदिति एवंप्रकारप्रभावेणधार्यतइति स्व
स्थितिलयपोषणरूपलक्षणं देवीरूपेतिराजसंबोधनम् १ विद्यातत्त्वज्ञानं तथैवेतिसमुच्चये तयादेव्यात्वंसुरथः एषवैश्यः समाधिः उत्तराद्धेऽप्य
न्वयि तथैवान्ये अन्येचेत्यर्थः विवेकिनअधिगतलोकयात्रास्तत्त्वाः २ मोह्यन्तइति मोहोमिथ्याज्ञानं उपेहीतिहृदिस्फुटंदसी ३ आराधितेति

यानंतथैवतत्सकलंब्रह्माण्डंमनुजेश्वर महाकाल्यामहाकालेमहामारीस्वरूपया ३५ सैवकालेमहामारीसैवसृष्टिर्भवत्यजा
४ स्थितिंकरोतिभूतानांसैवकालेसनातनी ३६ भवकालेनृणांसैवलक्ष्मीर्वृद्धिप्रदागृहे सैवाभावेमहालक्ष्मीर्विनाशायोपजा
यते ३७ स्तुतासंपूजितापुष्पैर्धूपगंधादिभिस्तथा ददातिवित्तंपुत्रांश्चमतिंधर्मेतथाशुभाम् ३८ इतिमार्कंडेयपुराणेसावर्णिके
मन्वंतरेदेवीमाहात्म्येफलस्तुतिः १२ ऋषिरुवाच एतत्तेकथितंभूपदेवीमाहात्म्यमुत्तमम् एवंप्रभावासादेवीययेदंधार्य
तेजगत् १ विद्यातथैवक्रियतेभगवद्विष्णुमायया तयात्वमेषवैश्यश्चतथैवान्येविवेकिनः २ मोह्यन्तेमोहिताश्चैवमोहमे
ष्यंतिचापरे तामुपैहिमहाराजशरणंपरमेश्वरीम् ३ आराधितासैवनृणांभोगस्वर्गापवर्गदा मार्कंडेयउवाच इतितस्यवचः
श्रुत्वासुरथःसनराधिपः ४ प्रणिपत्यमहाभागंतमृषिंसंशितव्रतम् निर्विण्णोतिममत्वेनराज्यापहरणेनच ५ जगामसद्यस्त
पसेसचवैश्योमहामुने ६ संदर्शनार्थमंबायानदीपुलिनसंस्थितः सचवैश्यस्तपस्तेपेदेवीसूक्तंपरंजपन् तौतस्मिन्पुलिने
देव्याःकृत्वामूर्तिंमहीमयीम् ७ अर्हणांचक्रतुस्तस्याःपुष्पधूपाग्नितर्पणैः निराहारौयताहारौतन्मनस्कौसमाहितौ ८

सैवेत्यनेनसर्वत्रफलदात्रीयमेवेतिसूचितम् भोगाः ऐहिकाः मार्कंडेयउवाच इतीति ४ प्रणिपत्येति संशितव्रतं तीक्ष्णव्रतं निर्विण्णः खिन्नः
ममत्वस्यापहृताध्यवसायः ५ जगामेति सराजावैश्यश्चेत्यर्थः एवमग्रेपि ६ देवीसूक्तं ऋग्वेदप्रसिद्धमहंरुद्रेभिरित्यादीत्येके श्रीसूक्तमाथर्वण
प्रसिद्धमित्यन्ये वस्तुतोदेवीसूक्तं नमोदेव्यैइत्यादिकंपंचमाध्यायस्थस्तुतिरूपं नचसर्वदेवताकृतस्याधामहात्म्यात् स्तोत्रम् शुम्भादिवधान्ति
मित्रस्यादिभिर्देवैर्देवेह सर्वक्लेशापरिहारार्थंयुद्धादिफलकं तत्कामाभ्यांताभ्यांजप्तम् अपुपदेशकृतत्वाद्भुक्तिसिद्धिहितत्वाद्इदमेवदेवीसूक्तंपठनमुचित
मुचितं लक्ष्मीतंत्रेसप्तशत्याःपुमर्थइतिप्रागेवनिरूपितमित्यपरे आराधयः संस्थितेतिबीजप्रोमवीजंकृत्वाशने विकालावित्युगात्प्रशस्तवादिनमोतकर
तविकासिद्धिदंतदेवदेवीसूक्तंपरंश्रुतमितिकश्चित्सकृते ७ अर्हणांपूजां अग्नितर्पणंहोमः पुष्पधूपाग्निदीपाद्यफलनैवेद्यादिकं आदौयताहारौपश्चान्निरा
हारौ ततोनिराहारौतत्कालमेव अनेनहठयोगःसूचितः तन्मनस्कौदेवीमनस्कौसमाहितौएकाग्रचित्तौ ८

राजैवेत्यत्र ... कारयितेदेष्टस्याप्यनिजासृक्सिक्तबलिदानाङ्गीकारे यि = २

ड॰ टी॰
ना॰
२९

तोवलिं च पशुकूष्माण्डादि परादं ददतः एवेत्यत्र राजेत्यादिः राजैव निजरुधिरसिक्तं एतेन वैश्यस्यान्यत्र ज्ञावेक्षतया सात्विकत्वेन कथं राजस
पूजायाः प्रवृत्तिरित्यपास्तं राजसपूजाधिकारत्वेन तत्र सात्त्विकफले बाधकाभावाच्च ब्राह्मणस्य सात्विकपूजया राजसफलवत् एवं च स्व
कारः स्पष्टार्थः यत्तान्नो ज्ञितविग्रयोः नवृत्तविपुवैश्ययोः सुवर्णकत्वेन वैदिकत्वशास्त्ररुधिरोदितबलिदानेकथमधिकारः तदुक्तं पद्म
पुराणे ... ब्रह्मचेतने प्रवृत्तस्य ... स्मरति श्रुति ... सर्वेषां पुराणानि ... पि कि
चित्क ... नार्थकृत्तमत्त्वनीश्वराः अधिकारिविशेषणानां प्रवदत्यर्थमात्मिकं ब्राह्मणः सविधो वाति शंकुतत्परित्यजेत् वर्णा
श्रमपरिभ्रष्टः प्रायश्चित्तेष्वत्र न्याय्यः वेदेतरागमगताः पापीनदृष्टमाचरेत् वेदवादेन तामस्य द्वितोनरकेगतात्स्वनि स्वतसंहितायामपि
तथापि ... वेदेन नविरुध्यते सोंशः प्रमाणमित्युक्तं केषांचिदधिकारिणाम् श्रुत्यन्तमलिनानां तत्प्राप्तिर्नो वेदमार्गतः सार्व
विभक्तिकस्तसिः वेदमार्गेणेत्यर्थः हीनानामितिशेषः पंचरात्रादयो मार्गाः कालेनैवोपकारिकाइति कोमेपि ब्राह्मणानां गौत
मशापेन त्रयीबाह्यत्वे जाते तैः स्तुतो शिवकेशवावि ... चकारमोहशास्त्राणि केशवः सशिवस्तदा कापालेनाकुलवामैरवंस्वर्ववै
सिमथ पांचरात्रंपाशुपतं तथान्यानि सहस्रशः कश्चित्कश्चित्पुराणादौ वेदमूलेपि सर्वेषां संतिनिर्मलतंत्रोशास्तत्र ग्राह्यानवैदिकैरिति मो

दद्यात्तौ बलिं चैव निजगात्रासृगुदितम् एवं समाराधयतो विभिर्वर्षैर्यतात्मनः २९ । १२ ॥

हशास्त्रत्वेन वैदिकफलदर्शनेन तन्मतं तत्र कापालौकिकफलेष्वपि विश्वस्य वसिष्ठाद्युपासितत्वादिकं तदर्थं बोधेषु च विश्वस्य वैदिकमार्गेत्याग
जमोहजनकत्वात्तंत्रशास्त्रानिर्मूलत्वं च वेदामूलकत्वात् पार्वतीश्वरसंवादे स्कान्दे विप्रवस्यामि तामसानि यथाक्रमम् तेषांश्रवणमा
त्रेणपातित्यंज्ञानिनामपि प्रथमं हि मयैवोक्तं शैवं पाशुपतादिकम् मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि ततः परम् कणादेन तु संप्रोक्तं शास्त्रं
वैशेषिकं महत् गौतमेन तथा न्यायं सांख्यं तु कपिलेन वै द्विजन्मना जैमिनिना पूर्वं वेदमयार्थतः निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम्
धिषणेन तथा प्रोक्तं चार्वाकमतिगर्हितम् दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा बौद्धशास्त्रमसत्प्रोक्तं मायावादमवैदिकम् मयैव क
थितं देवि जगतां नाशकारणात् इति न्यायविशेषिकयोः स्वतः दुःखादिमत्वमात्मनः श्रुतिविरुद्धं निरीश्वरत्वं सांख्यमीमांसयोः श्रुतिविरुद्धं
ति तद्देशे तेषां मप्रामाण्यं मायावादो नास्तिकानां वासिष्ठे लोकौ वेदमार्गपरित्यज्य तत्र मार्गेण विसृज्य केशाडिम्पेप्रतिविष्णुवचः धिग्धि
कशाडिम्पदर्शेहे सहसीत्वमतो भयाम् कोसौ वर्णाश्रमाचारश्चोतेय मुक्तत्वया विना शक्तः पापबलात्यक्तवान्सितेधिक्कृतिः श्रुतौ क्रमा
जेतापि शाडिल्यकृता पूजा ममत्वया अतः कालेन महता वेदमार्गे गमिष्यसीति अत्र पापबलात्यक्तरित्यनुपपन्नवत्सया पमेवतत्यागेनं तथ
वेशोचकारत्वमितिसूचितम् सप्तमैवत्रयाधिकारिकत्वं च तेषां सूचितम् तत्रैव स्थानान्तरे पांचरात्रं भागवतं वौद्धं दिगंबरं तथा लोकायतं च

२९

कापालं सोमं पाशुपतं तथा । लाकुलं भैरवं वामं शाक्तं शांभवयामले । एवंविधानि शास्त्राणि विरुद्धानि महात्मने । स्वतः प्रमाणभूतेन वे
देन श्रुतिसत्तम । वैदिकस्तानि शास्त्राणि मनसापि न संस्मरेत् इति । सर्ववेदाविरोधेन प्रमाणं नान्यथा भवेत् । तस्मात् सर्वप्रयत्नेन ब्रह्मत्वे
द्विजोत्तम । त्यक्त्वा वेदविरुद्धानि वेदमेकं समाश्रयेति च । सर्वस्मिन्पुराणे देशजातिकुलधर्मादिकं त्यक्त्वा । स्वागमैः कल्पितैस्तैस्तु जनानाम
हितकाम्यया । मां च गोपय येन स्यात् सृष्टिरेषोत्तरोत्तरेति वाराहे । अभावे वेदमार्गाणां पाञ्चरात्रादितो विधिरिति । सावर्णे श्रुतिभ्रष्टः श्रु
तिप्रोक्तप्रायश्चित्ते भयं गतः । क्रमेण श्रुतिसिद्ध्यर्थं ब्राह्मणस्तन्त्रमाविशेत् । पाञ्चरात्रं भागवतं तन्त्रं वैखानसाभिधम् । वेदभ्रष्टान्समुद्दिश्य कम
लापतिरुक्तवानिति इति चेन्न श्रौताचारनिरतविप्राणां विशेषलाभे वेदमन्त्रा श्रौतानामार्चनेन तन्त्रेण न स्यात् कुशलाभमिति । मन्त्रराजानुष्टुभविधाने
उक्तत्वान्मन्त्राधिकारात् श्रौतानां वैदिकैरेव मन्त्रैः साधारणीयस्त्राणां तान्त्रिकैस्तन्त्रोक्तैः न केवलमागमं श्रौतमा[illegible]
[illegible] नागमस्य वीजप्रदेशपथुतवैदिकैर्न वाममार्गकुलापनमृजनम् । [illegible] वीजतपोनाप्रितत्वान्यासादिरूपमंत्रः तत्कुद्दश्रौ
तन्यासस्तान्त्रिकन्यासः प्रथमलापनरुपतिशिष्टसंध्याप्रकरणे तदुक्तं सावित्र्याः ऋषिर्देवताच्छन्दांसि न्यस्य देवतामेवावाहयेत् ताभे
तावत्तरशो विभक्ताम् [illegible] नैः षडङ्गानि मन्त्रैर्ध्यानमात्मनि विन्यस्यात्मानं तद्रूपं भावयेत् । यथा । तत्सवितुर्हृदयाय नमः । इति
हृदये । वरेण्यं शिरसे स्वाहा इति शिरसि । भर्गो देवस्य शिखायै वषट् इति शिखायाम् । धीमहि कवचाय हुं इति कवचं उरसि । धियो यो नः
नेत्रत्रयाय वौषट् इति नेत्रत्रयेषु विन्यस्य । प्रचोदयादस्त्राय फट् इति करतलयोर्न्यासः । गायत्र्यादिकशादिहृदयादिषडङ्गन्यासः । एवमप
केनेदं तिसदिविधिर्वैदिक इति । प्रथमं त्रैवर्णिकाधीयेदिति । अनेनेमं पूर्वं विन्यासात्तरेणान्त्रिकमन्त्रेषु पुनर्न्यपकृता संचिता । ए
केषां प्रांप्राप्तं लक्षणं इत्यर्थः । अनेन तेषां तन्त्रेणाधिकारउक्तिः । द्वियुतः सविधिर्वैदिक इति तन्नेनोक्तं विप्राः । अनेन तन्त्राणां वेदमूलकत्वमि
त्युक्तम् । तत्र यादिविषयकता चस्पष्टमुक्ता । विप्राणां वैदिकमात्रेऽधिकार इति चोक्तं । अन्यथा तन्त्राधिकारिणः प्रतिन्यासानां सर्वेषां सम
ततयाप्यकेवलं किरस्यतास्मात् । अत एव प्रपञ्चसारे एकोनविंशपटले गायत्रीमन्त्रविधौ सबुद्धि विसुकदेशमेषयेः सदाशिवेः समस्तोमा
द्यैः उक्तो दशन्यासं समादितत्याने न्यासानुक्ता । एवंकृत्वा तत्सिद्ध्यर्थं गायत्रीं दीक्षितो जपेदित्युक्तं । एवमुक्तप्रकारेण न्यासान्कृत्वा दीक्षि
तः वक्ष्यमाणकलशाभिषेकलक्षणगायत्रीविषयतान्त्रिकदीक्षावान् जपेत् इति तदर्थः । अनेन तादृशदीक्षावत एव न्याससहितैकजपेऽधिका
र इति तस्य गुरुवैदिकस्य तन्न्यासेऽधिकार इति स्पष्टमेवोक्तं । तथा च शारदायां न्यासानुक्त्वा तल्लक्षविधानेन सिद्धा[illegible] ि
यः स्वाहृतिवश्यसम्प्रज्ञा गायत्रीं दीक्षितो जपेदित्युक्तं । अनेन प्रवश्चरणमपि तान्त्रिकमिति स्पष्टम् । एवं बोधायनादिभिर्येदुक्ततदिति विषयन्या
सपूर्वकजपहोमादिकथनं तद्विशेषागमाद्युक्तान्त्रिकदीक्षावतामेव नान्येषामिति बोध्यम् । अत एवार्षेषु ब्राह्मणेषु प्रथमं तत्त्वमार्षेः प्र

अनन्तर्भवन्ति क्रमशास्त्रस्थिति सिद्धिक्रियादियोगे ५   न पिच्छन्दो देवतब्राह्मणार्षं = २   रहस्यं निषं॰   यथा स्यात्तथा वर्णादयो यथा तथा नस्यात्तथा प्रयोगं यस्य परे प्रकाराभावात् =

कु॰टी॰ ना॰ १२

द्देशो भवतीत्युपक्रम्य योस्यात्विति दित्यादिष्वेकैकं दैवतब्राह्मणेन मन्त्रेणायाजयति बाध्यायापयति वास्यायां स्थाणुं वर्छति गर्तं वापतति प्रमीयते पापी यान्भवतीत्यादि यामाख्यातं सांसिभवतीत्यर्थं तद्युक्तं यथा रक्षते एकैकस्यापि दिव्यवषट्कारमतिथिं भवतीत्यादि अविदित्वा मन्त्रकृत्त्वेधी यं वक्ष्यमाणं प्रदेशं उपदेशो न त्वधिकृत इत्यर्थः ब्राह्मणपदेन तद्विनियोग इति तस्मात्सकृतः यातयामत्वं तद्रहस्यं मीनदत्वं जी॰ लोचप्रतिप्रर्थं च यातयाममिदं हृदयमिति कोशः मन्त्राणामेवमेवत्वं तेन तद्विकालमनध्ययनात् इदं दिन्यासादीनामवैदिकत्वमाह यत्तु भा गवतवैदिकस्तां त्रिकोमिश्र इति मन्त्रीविधामनः यथाणामीमांसितेनैव विधिना मां समर्चयेदिवकं तत्र सापूर्वोक्ताधिकारानुसारेणवोध्या मिश्र वैदिकप्राधान्यं तेन प्राधान्यान्यथादृष्टा मन्त्ररपि निःश्रेयसकरं कर्मद्विजस्येति त्रिवर्णतः वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संय मः अहिंसा गुरुसेवा च निःश्रेयसकरं परम् सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः सर्वेषाम पि चैतेषां शुभानामिह कर्मणाम् किंचिच्छ्रेयस्करतरं कर्मोक्तं पुरुषं प्रति वेदाभ्यासमेव सर्वेषां कर्मणां श्रेष्ठत्वे हेतु श्रेयस्करतरं ज्ञेयं सर्वेषु कर्मवैदिकम् इहचामुत्र काम्यं प्रवृत्तकर्म कीर्त्यते निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते एतद्विजन्मसाफल्यं ब्राह्मणस्य विशेषतः प्राप्ये तत्कृतकृत्यो हि द्विजो भवति नान्यथा या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः उत्प द्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित् तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम् अशक्यं चाप्र मेयं च वेदशास्त्रमिति स्थितिरित्याह अस्यार्थः वेदाभ्यासः उपदेशकशास्त्राभ्यासः तद्बोधितं तपः कृच्छ्रादि ज्ञानं आत्मज्ञानं अत्र वेदशब्दो न मुख्ये वेदपरः किंतु तेषु प्रयोगमशक्यप्रयोगान्नसाधारणः सर्वेषामेषां धर्माणां वैदिककर्म श्रेयस्करतरमिति वक्ष्यमाणसंगतेः सर्वेषा मेषां धर्माणामित्यस्यासंगतेश्च आत्मज्ञानस्य परत्वमाह तद्धीति एवं वेदितव्याभ्यासतद्बोधितपआदीनां वैदिकत्वेः साम्यं किमिताशङ्क्यो त्कृष्टं कर्म वृत्तिं किंचित्स्यादिति सर्वेषां तांत्रिकवैदिकानां उत्तरयति धर्माणामिति श्रेयस्करत्वं दर्शयति एतानि वैदिकत्वात्सद्यो विहितानि वक्ष्यमाण तन्त्रोक्तानि तान्त्रिककर्मजन्यफलानामैहिकानां तेषां शीघ्रं जायमानानामपि क्रमशः कालक्रमेण किंचिद्विलम्बेन वैदिककर्मतो ला भेन तान्यज्ञानमेव वर्तते तस्मिंस्तस्मिन् तत्फलजनकं ज्ञानस्वरूपं ज्ञानकारणम् अनेन निवृत्तस्य श्रेष्ठत्वमुक्तम् वैदिकत्वेति एतद्धीति ब्रा ह्मणस्य विशेषतः अनेन तपआदिविना न्यूनानधिकारः तत्क्रियादेस्तत्र ज्ञानस्य चाधिकार इति सूचितम् तदेवाह प्राप्येतदिति एतद्धि कृतान्त्रिकं च अतः हितं पदं विप्रेतरपरम् न तु किं तद्वैदिककर्मत्यत आह या वेदबाह्या इति वेदमूलास्ते तु न तु याः कुदृष्टयः वेदविरुद्धा च्चा र्वाकादिस्मृतयः ऐहिकमात्रफलाः वेदविप्रतिपन्नबुद्ध्याकृताः निष्फलत्वे हेतुमाह उत्पद्यन्त इति तत्कालेऽस्पद्यन्ते दृष्टादिमोहाद्धेतुनः सत्यमुक्तादौ च्यवन्ते विलीयन्ते अतो वेदादेरमूलत्वे तेषु यान्यप्रामाणीत्यन्वयः येहेतो मानं मतिविनाशशालित्वात्पौरुषेयत्वमाधिता १२

किंचित् श्रेय॰ =   ३०

वेदाभ्यासम् श्रेयस्करे वेदपरत्वेन स्यादि उक्तगतस्यार्ह =

पार्वण ब्राह्मणयोः ब्राह्मणप्राप्ये वैदिके तन्त्रिये मिश्रे वे दृष्टस्यानुक्ते =

वेदाभ्यासादीनां =

अभ्यासतपआ दिनि॰ =

च यत्तोक्तानि अस्मत्परपालिपारलौकिकफलानि सेवनवादीनि वाम: श्रुतानि फलानि अतः केवलं वैदिकं कर्मैव कुर्यादेव विप्रः तत्त्विया
दिश्यमिश्रसेवैव अनेन तन्त्रियादेरपि तांत्रिकफलमेवेति सूचितम् एतदुपरीत्येन वेदस्तौति पित्रदेवेति वेदः सर्वेषां चक्षुः नेत्रत्वम
नुष्ठानामेवत्यर्थः सनातनं सर्वकालिकमनाद्यनन्तत्वात् तत्त्वमेव दर्शयति अशक्यं कर्तुमशक्यं सकलतन्त्रदर्शनात्तत्त्वस्वरूपके
घभावात् वेदतो ज्ञानपूर्वकमेव हिरण्यगर्भादिकर्तृकस्मृतिश्रवणाच्च बुद्धिपूर्वकृतत्वेनास्मर्यमाणत्वाच्च यस्य निःश्वसितं वेदाः।
सर्वै - तिश्रुतेश्च अप्रमेयं इयत्तया परिच्छेत्तुमशक्यम् अनन्ता वै वेदा इति श्रुतेः व्यासस्तावपि अतः सपरमात्मयोगो वेदाद्गम्यते
अष्टः सत्वविलेयोपघः त्रयाणां दिशुस्थितः आदिनेति दासादि अथ बुदिते अनेन तेषामादीनां नामहिपतिपत्रत्वेवद्याकृतत्वं सूचितम् सा सर्वै
तुदिश्यादाद्यातेषां ततः फलमपि तपोमाहात्म्यादि तु इति दिक् विश्वस्यापि पूर्वकृतपापवशाद्वैदिकमार्गपरित्यागपूर्वकं तेन समामोऽप्ये।
णप्रकारान्तरेणवाधुष्टस्यतेषामधिकारः एतच्चोक्तं सांबपुराणे स्पष्टम् अत्र सांख्ययोगाः पांचरात्रं वेदाः पाशुपतं तथा आत्मप्रमाणा
नेतानि तन्त्राणि हेतुभिरिति निर्भरतंत्रेषां नियोगाः प्रमाणं तदतिरिक्तशास्त्रं वेदाविरुद्धस्यापि अनुविशदस्य प्रमाणत्वात्
तथापि योऽशो मार्गाणां वेदेन न विरुध्यते सोंऽशः प्रमाणमित्युक्तं केषांचिदधिकारिणामिति स्कन्दे लिंगे: केषांचिद्वेदप्रमाणेन तु सा।
वैषामिति तदर्थः आगमानुपक्रम्य अधिकारिविभेदेन प्रवृत्तानि संशय इति वामनपुराणेऽपि एतेभ्यस्त्वपरो यस्मात् धर्माभासाभि।
धायक तद्धर्तास्तत्र मोहनस्य आश्रयोऽयतः धर्माभासः वेदमूलो वेदविरुद्धस्य मोक्षोपायो मोहाश्रय तत्र तु ग्रहास्तद्धनो मोहजनना
यतश्च: न किंस्मान्नो विधर्मरूपाज्योनेयाद वेदाद्विनिर्मितः कार्यस्थितिर्यत्स्मृतेपुरा प्रपन्नेनात्र तिष्ठन्तमिपि तत्त्वं वर्जयेदिति स्मृत
मिश्रस्य वेदार्थस्यास्तन्नमित्यर्थः एतेन वेदमूलत्वं दर्शितं वेदार्थविनिमन्त्र तथापि प्रतिनेत्रवेदाविरुद्धांशानुष्ठाने शीघ्रं मोक्षमार्गप्राप्ति।
विति विशेषः यथा तन्त्रमतपरिग्रहार प्रसादितानुदितमोक्षस्य वस्थितो तथा वैदिकानां वेद एव प्रमाणं पुष्टानां तन्त्राणि अष्टसाणा
शास्त्राद्यागमास्य प्रमाणमितिव्यवस्थाबोधा अनुविशोपि मिश्रसूत्राधिकारी तेषां पात्रवैदिकेषु तस्याधिकारात् किंच ब्रह्महत्यादी
नाप्रायश्चित्तकरणकाले संध्यावन्दनादिवत् तत्रनिवनन्दसमायोगमेधनुयज्ञ इति श्रुतिहलाहलस्य स्थानेकमेव सांध्यमेवाधिकार
वच्च तस्य वैदिकेष्वधिकारात् वैदिकतान्त्रिकयोः परस्परमस्तु नाना तत्रेषु तान्त्रिकमतो वैदिकं न स्पृशन्स्यदा वैदिकस्यापि तेष्वद्री
तांत्रिकस्य— विते न स्पृशेत् सदेवितावासिद्धलोगोक्तेः न च वैदिकस्याश्रुचिता तांत्रिकस्य देवतासान्निध्यमिति बोध्यम् यत्र तन्त्रमेवश्रुत एव मार्गाणां वैदि।
क्रमार्गादाधिकाकृतनमु तत्र श्रवणादिरूपतदधिकारिणः प्रतिचनार्थो मोहनार्थं च तादृशा मोहेपूर्वजन्मकृतपापमेव कारणम् पावा।
रात्रेव कापालपाशुपत्वेषु च दीक्षितास्तु भविष्यन्तिमत्त्वाः पापकर्मिण इत्युक्तेः कचित्तेत्राबरोधेन धर्मे पौराणिकाद्यपि वदतीना

तान्त्रिकस्य प्रों = अत्र चिना त्रिकस्य चिवैदिकस्य शेऽनुचितस्येषस्वति बन्याद्देवतायासान्निध्यम तन्त्रोक्ताः श्रेष्ठिमस्पानादि सेवनकृताशोऽन्दं तथ्य तान्त्रिकस्यदेवतासान्निध्यम्
वेदस्मृतिनिषिद्ध

दु·दी·
ना·
२१

दृष्टौ शास्त्रशास्त्रं चावलं विनेति पराशरोक्तेः अमृतागोत्युक्तेष्वज्ञात्विशुद्धिसुज्ञानामाधारभूतं नद्यनुसारेणान्ततस्थितिनिर्लेपस्यो कस्तत्रे
यान्नुसार्येव शुक्राङ्गावैदेवानामिति श्रुतिविरोधात् अत एव देवीपुराणे उपवासात्परं भैक्ष्यं भैक्ष्यात्परमयाचितम् अयाचितात्परं
नक्तं तस्मान्नक्तेन वर्तयेदित्युपक्रम्य वामाचारो महादेवि नक्तेनोदरवर्तनात् नित्यनक्तं तेन नक्तादिव्रतं तुलादिकरणं च वामाचारात्तत्र गीतमि
ति बोध्यम् इदं चतुर्थादिनक्तविषयं न च ब्रह्मस्यापि विप्रस्य वामाचारे नाधिकारः यो दाहो[illegible] विना विप्रो महामायां प्रपूजयेत् सपापः दक्षिणाचारः
स्वर्गलोकान्नश्यते भवति रोगभृत् विप्रो यः पूजको वामः सोमपाउएवर्जितः इति कालिकापुराणात् दक्षिणे दक्षिणमार्गो कथ्यते विप्र।
पालितयागनवप्रवेशोपि मद्यमांसाद्यैर्विप्रस्य नाधिकारः स्वगात्ररुधिरं दत्वा स्वात्मवध्यामवाप्नुयात् मद्यं दत्वा ब्राह्मणस्तु ब्राह्मण्यादेव ही
यते इति कालिकापुराणात् वामागमोपि विप्रस्य मद्यमांसं न भक्षयेत् स्वकीयापरकीयावानाद्यान्मद्यं ब्राह्मणो यजेदिति श्रीविक्रम
संहितायां च मांसादिलिङ्गितत्वचनाच्च आकृष्ट्यस्य धनदारादिना वशीकृत्यमर्थः आगोनपिशितैरन्यैः स्वस्यापि स्त्रेश्वरि वर्णाश्रमोचि
तधर्ममविचार्य यजेनिये अत एवापि ब्राह्मणो भवति ब्रह्मराक्षसः इत्यागमसंहितायां गौरीं प्रति शिववाक्याच्च मद्यद्रव्यं ब्राह्मणस्य नेत
रो कदाचनेति वचनान्तराच्च तद्विशेषयोरप्यष्टादशविधमद्यदानमेव न तु दानम् न च तयोरनधिकारात् एतेन मोक्षा[illegible]पलादि स्वरा
नायेन विप्रस्यापि मद्यादिस्वीकारेण दोष इत्यपास्तं शास्त्रस्य तदधिकारिशूद्रादीन्प्रति सार्थक्यात् त्रैवर्णिकस्यैव यजनयाज[illegible]धिकारा
तस्य वस्तुतायहणशास्त्रस्यैव यथोक्तेनिपाते प्रतिपादितदोषाभावकल्पनयुक्तम् न हि वामाचारीयमद्यादिविधिः तत्राव[illegible]पालनाद्या
यो कांचनपरिदृश्येदिमकं न स्यायमर्थः याकाचापि भोगोद्योऽथ तत आगता नाः धर्मेऽभ्यात्मजे न किं तु तन्मुदाष्टभागीयभूतमन्त्रा
मद्यादुपभोग्येदिति न च वलात्तस्य प्रवर्तनीयेति तद्यः अत एतेन न्यायेनात्र ब्रह्मीभोगादेवीयलक्षणं प्रति न धर्मत्व वक्तव्यो योगपत्र न दूपास्।
न वदस्य ब्राह्मणमात्राधिकारिकत्वाभावाच्च वेदस्य माहितं कृत्वा इत्वा विधेयस्य न तत्साम्यकत्व ब्राह्मणस्य गवां तीरमिव्रजेत्य अनालिप्तश्च
विप्रो ब्राह्मणपदार्थः पीत्वा पीत्वा पुनः पीत्वा पतित्वा धरणीतले उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते इत्यादि तत्र शूद्रपरमेव लोका।
व्यवहारे मद्यादि लोनिद्रतस्यापि शूद्रस्य सौत्रामण्यादिव्याघ्रनपूजाकाले तत्स्वीकारो वाध्यः मद्यं ब्रह्मशापदग्धं ब्रह्मशापशुक्रशापविमोचन
नप्रकारोपि शूद्रस्यैव तेविनातेन तद्भवेन पूजने शूद्रादीनामसिद्धिप्रतिबन्धात् अत एव देवीपुराणे वेषाणां गोपवाला हेतोः शूद्राणामेव स
त्र च शूद्रस्त्रीषु विशेषेण बलिं दद्याद्विरेषु च लोके मन्त्रेण मार्गेण वामाचारेण सिद्धिरिति शूद्रादीनामेव तत्राधिकार उक्तः लोको मन्त्रेण
लोकविलक्षणेन तदङ्गीकृतेन न्यायः स्त्रीशूद्रेनातिशय विप्रादिस्त्रियापि ब्राह्मणस्य साक्षात्सुरबलिदानमपि न भवति ब्राह्मणस्य बलि
र्थे तत्र तथाविहितः क्रमः कृत्वा तु तमयं पिष्टं हनं ते याति च भैरवम् अथवा आसपरिकृत्तं यवचोरमयं च वा हानयेत्स्वहस्तेनेति कालिकापुराणम् २१

श्वचरसिंहव्याघ्राद्युपलक्षणं हृषीकंस्थीफलेनेत्युक्त्वादिके दोषमनुत्वोक्तेः यत्र अद्वैतज्ञाननिष्ठो योगी सोसंसारपारगः सएवयज्ञेवा।
देव्या अधिकारीपरो भवेदिति सिद्धनाथसंहितायामुक्तम् तत्र नैयथाश्रुतेनाहंकारात्मककर्ममात्रेऽनधिकारात् तस्मादनन्तरमुक्तम् सार्व
भौमो यथा राजा स्वच्छन्दं वर्तते भुवि प्रारब्धकर्मणा ज्ञानात्स्वच्छन्दं वर्ततेतथेत्यादिना यथानस्याहारविहारादिषु नियमः शास्त्रेण दर्शि। अद्वैतज्ञानिनः=
तस्तथा योगी यथेष्टाहारविहारशाली लोकलज्जाहीनः शूद्रादिः सर्वत्रोऽधिकारीतितदर्थः वस्तुतः सार्वभौमो यथेत्याद्यपि ब्रह्मज्ञानस्व
तिपरं न तत्र तस्य स्वच्छन्दाचरणमस्ति ज्ञानिनः प्रक्रम्य प्रारब्धकर्मप्राबल्याद्योगी यदि भवेद्यदि क्षिप्यते समदाङ्गः त्वं भूत्वा विहितं ब्रह्मीनवत् यथास्मात्रथा=
यथेष्टाचरणं तस्य रागाद्येनविदिष्यते इत्यभिप्रायोक्तेः सनत्कुमारसंहितायामप्युक्तं बाह्यपूजानकर्तव्या कर्तव्या बाह्यजातिभिः
साच ब्रह्मपदावाप्तिमैहिकार्थैकसाधनात् न कर्तव्येत्यस्य विशेषरिति शेषः नयहकर्तव्या वाह्येति बाह्यानाह बाह्यपूजारताः कौ।
लाः क्षपणाश्चकापालिनः दिगम्बराणि तिहासा वामकास्तेचवादिनः अन्तराराधनपरा वैदिकाब्रह्मवादिनः जीवन्मुक्ताश्चरस्तेते वि।
ष्णुलोकश्च सर्वदेति ऐतिहासादिभैरवयामलादितन्त्रप्रामाण्यवादिनः क्षपणाद्याः हस्तीयागप्रधानाः तन्त्रवादिनः श्रीविद्याप्रधाना।
ग्रा= ज्योत्स्नाविद्यादितन्त्रप्रामाण्यवादिनः अन्तराराधने देवतानामात्मानुसंधानरूपे यदा बाह्यपूजाबाधककर्तव्यपूजावाक्यशेषत्वेनो
वलाभात् अन्तराराधने वैदिकमन्तरं तामाराधनेजीवन्मुक्ताइत्यस्य तत्रैवमर्थः ब्राह्मणानुपक्रम्य मिश्रके कौलमार्गे च परित्याज्यं हि
शाक्तीति वचनाच्च कौलमार्गो वामाचारप्रधानो मार्गः मिश्रके यत्र वामदक्षिणोभयमार्गकथनं एतेनान्तराराधनपरा इति
कौलमार्गोक्तानयोगपरमिश्यपास्तम् तन्त्रोक्तमार्गस्य ब्राह्मणं प्रति सर्वथा माज्यत्वकथनात् वेदनिष्ठा पि तन्त्राणि तान्त्रिकाश्च न
दूषयेत् तन्त्रनिष्ठस्तथा वेदान्वैदिकांश्च न दूषयेदिभ्य पितनदधिकारिणोनिंदानकर्तव्येत्यर्थः स्वधर्मे निधनं श्रेयः परधर्मो।
भयावह इत्युक्तेः एवं च वामाचारप्रसङ्गो ब्राह्मणोपि निषिद्ध एव वेदाध्ययनप्रवृत्तशूद्रवत् एवं च षड्विधाः दक्षिणमार्गप्रधानतो।
ऽधिकारः कुण्डगोलकादीनां संकराणां शूद्रादीनां चेतरज्ञाण्यधिकारः विप्रादिजातकुण्डगोलकादिप्रामाण्येव अस्त्रे योगिनीतन्त्रे सर्वे
वर्णाद्विजानृपः निहन्ते योगिनीतन्त्रे सर्ववर्णाः पृथक्पृथक् इत्यादिवचांसि कुण्डादीनामप्युनयनोक्ता द्विजातित्वात् ननु कुण्डजातस्य
गोलकस्य ब्राह्मणत्वाच्च एतदभिप्रायमेव सौत्रामणीयागमूलकं सौत्रामण्यां कुलाचारे विशेषमद्यं न दुष्यतीति पठन्ति प्राधुनिकाः तावि
षये व्यवस्था वैदिकतान्त्रिकवैदिके चाधिकारस्सति निजमार्गप्रामाण्यादित्येवलिङ्गानं तयोर्न विरुद्धं तथा तन्त्रसदाचाराणामपि शूद्रकुण्डगोल
कादीनामेव लिङ्गचक्रादिधारणमुपक्रम्य विप्रस्यैतद्विगर्हितमाप्रायश्चित्तमुदीरितम् शूद्रधर्मरतानां हि लिङ्गचक्रादिधारणमिति यामले

दु॰टी॰
ना॰
३३

ऽहेः एतदर्थकमूतयत्नपैः कल्पिता एव ग्रन्थप्रलंभात् तथाप्युपलभ्यंते नागोपि वेदभाष्यकारादिभिस्तथा व्याख्यानात्तत्रार्पितः विंश
त्युत्तरशतमपि श्लोकानाम विषयएवावगमादिति दिक्सैवेति सततं सेविता दोषस्पृह भस्मयारण्तह्योमान्ते वैदिकैरेवतलेप्रसत्का तुप्रस
न्ना प्रहृतमनुस्मरामः ४ प्रमदमितिक्रियाविशेषणं देव्युवाच यदित्यत्र राजे कुलनंदनेति वैश्यसंबोधनम् ज्ञानार्थित्वेन प्रशस्त
त्वात् ९ मत्त इति प्राप्यतां स्वीक्रियतां तत्प्रार्थ्यमाने मार्कंडेय उवाच तत इत्यत्र राजे प्रविभ्रंशि चिरस्थायि ११ अत्रैव च अत्रापि

परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडिका देव्युवाच यत्प्रार्थ्यते त्वया भूप त्वया च कुलनंदन
९ मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत् मार्कंडेय उवाच ततो वव्रे नृपो राज्यमवि
भ्रंश्यन्यजन्मनि ११ अत्रैव च निजं राज्यं हतशत्रुबलं बलात् सोपि वैश्यस्ततो ज्ञानं वव्रे
निर्विण्णमानसः १२ ममेत्यहमिति प्राज्ञः संगविच्युतिकारकम् देव्युवाच स्वल्पैरहो
भिर्नृपते स्वं राज्यं प्राप्स्यते भवान् १३ हत्वारिपूनस्खलितं तव तत्र भविष्यति मृतश्च भूयः
संप्राप्य जन्म देवाद्विवस्वतः १४ सावर्णिको मनुर्नाम भवान्भुवि भविष्यति वैश्यवर्य त्व
या यश्च वरोस्मत्तोभिवांछितः १५ तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति मार्कंडेयउ
वाच इति दत्वा तयोर्देवी यथाभिलषितं वरम् १६ रामाय नमो नमः

अस्मिन्नन्मन्यपि हतशत्रुबलमिति राज्यविशेषणं ज्ञानं तत्त्वज्ञानम् निर्विण्णमानसः संसाराद्विरक्तमानसः १२ ममेत्यहमिति
स॰ यः संगस्तद्विच्युतिस्तन्नाशकारकमिति ज्ञानविशेषणम् समासश्छांदसः प्राज्ञस्तत्त्वबोधयोग्य इति बुद्धिमत्त्वात् देव्युवाच स्वल्पैरिति स्वल्पैरिति स
मस्तं १३ हत्वेति तत्र राज्ये तवास्खलनं भविष्यतीति इतराकृतराज्ये १४ सावर्णिक इति यहाचक्रं नाम तदुपलक्षितो मनुर्वैवस्वतः वैश्यवर्येति
त्वया चापि अस्मत्त इति बहुवचनं स्वस्य सार्वात्म्यद्योतकम् १५ तमिति संसिद्धौ मध्ये मोक्षार्थं चतुर्थी ज्ञानं तत्त्वज्ञानम् मार्कंडेयउवाच इतीति ३२

दु॰ टी॰ मा॰ १३ बभूवेति देव्याः स्वपादाने पंचमी १२ सूर्योदिति सावर्णिर्भविता मनुरिति तस्य पुनरावृत्तिर्वक्ष्यमाणकात्यायनीतंत्रात् अंतेम
नुरित्यनेन सावर्णिरित्यारभ्य सावर्णिर्भविता मनुरित्यंतो ग्रंथो महामालामंत्र इति सूचयति तदुक्तं लक्ष्मीतंत्रे सम्यग्गृह्य दिव्यला
सेयं जन्मकर्मावलिस्तुतिः एतां च द्विजस्तवान् ज्ञात्वाधीयानो नरः सदा विधूय निखिलां मायां सम्यक् ज्ञानं समश्नुते

बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता २७
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः १२
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः २८ २९
इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवी
माहात्म्ये सुरथवैश्यवरप्रदानम् १३ रामः

सर्वाः संपदश्चाप्नोति धुनोति सकलापद इति द्विजस्तवान् ज्ञात्वेत्यनेनाष्टम्यां वा चतुर्दश्यां वा इत्यादिकीलकोक्तप्रकारेण ज्ञानं
सूचितमिति सर्वं सुस्थिरं इति कालोपनामकश्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते सप्तशतीव्याख्याने त्रयोदशो १३
ध्यायः १३ ॥ शुभमस्तु मुन्यब्धिवसुचंद्रेह्वेरंकमेशरे तिथौ नागोजीकृतटीकेयं जीवनाख्येन चित्रिता शिवम्